V/3

In Complete

Didhiti	Title
Raghunatha Shiromani	Author
	Editor
	Year, Vols.
SAC	Publisher
Presented by Pt. V. R. Trivedi.	Remarks

V/3

करप्रसंगात्।अंशांशिकत्वोपगमाच्च।नापि प्रवृत्तिनिवृत्तिजनकत्वं अजिज्ञासितविषयत्वं वा।तादृशादपि स्मृत्युत्प
त्तेः।नापि संस्कारजनकत्वं।तज्जनकतावच्छेदकरूपांतरापरिचयात्।दृश्योपाश्रयप्रसंगात्संस्कारात्तु मत्रैते वा स्मर
णासंभवे स्मृतिजनकतापातेन दृष्टप्रवेशाच्च।नाप्यनुभवत्वेन जन्यत्वम्।संस्कारस्य फलनाश्यत्वमते सकृदनुभूतस्य स्मर
णोत्तरमनुभवस्मरणप्रसंगात्।समानाकारस्यैव फलस्य नाशकत्वात्तत्राहाले वस्त्रादितो नैकैकगोचरत्रिकस्मरणा
नुपपत्तेः।।नैव पुनः पुनः स्मरणादृढतरः संस्कारः।परिमाण्य च निश्चितानामभिचारकं रूपं गदयमाणाव्यभिचा
रेणाकारराग ज्ञानुदयात्।इदमेव चान्यत्र सामान्यस्य हेतुतावच्छेदकत्वे बीजम्।अभिहितं च तत्त्वसर्पदीकायां
प्रथमस्त्वेवं वयवर्ज्य चेत्तत्र प्रस्तावे मिश्रैः स्मृतीनां स्वकार्ये संस्कारविशेषितानामसद्भावादिति चेद्वा चरमज्ञान
परस्यानुभववपरत्वेन स्मात्तज्ज्ञानत्वस्य विवक्षितत्वादित्यपि कश्चित्।किंच व्याप्यविशेष्यकात्वस्य विशेष्यका
द्युपरामर्शोत्तरानुमितिरेतहाति बहुभयपदेवैशिष्ट्यावगाहिनिश्चयत्वेन तत्र हेतुत्वं वा च्यते।लघुत्वघटकमपि न देवं।

...नरविशेष्यस्मरणाभावात्। अन्यथा नियमेनस्मृतेरुभयविशेष्यकतापत्तेः। समानप्र
शिरोम. एवं नरविशेष्यकत्वं तयोः कार्यकारणभावात्। तत्र विशिष्टेव कार्यकारणभावः न तु कुरूपेण गौरवात्। प्र
५ कारकत्वेनैव तत्र [illegible] शिष्टवैशिष्ट्यबोधे तदेकापि नातिप्रसक्तिशंकापि। वह्न्याद्यनुमितेर्वह्न्यादिव्यभिचारधीवि
नाभावात्। एवं [illegible] धर्मप्रकारकपक्षधर्मताज्ञानत्वेन हेतुतामते तु वह्नित्वावच्छिन्नत्वेन लक्षणेऽपि प्रवेशात्। अत्र नरव्या
रोधिधीवि[illegible] भावज्ञानेऽतिव्याप्यवत्पक्षादिज्ञानत्वेन हेतु [illegible]
प्यपत्तेः [illegible]
त्वेऽपि [illegible]ः। व्याप्यविषयकत्वेन वा जन्यं ज्ञानं विशेषणीयम्। एतेन स्मृतिप्रसंस्कारद्वारानुभवं प्रति च साक्षा ति ४
हि [illegible] विषयोहेतुत्वस्य निर्विकल्पकात्मकस्य वा स्मरणस्यानुभवं प्रत्येव चातस्माद्धेतुत्वस्य नियमतः कृतिसा
साक्षात्कारत्वं विषयस्मृतेस्तु कल्पनात्। व्याप्यवत्पक्षवत्त्वादिज्ञानेतिव्याप्तिरिष्टविपरीततम्। साध्याद्रेव [illegible] मादे रा.
रो पादाने [illegible] अनुमितौ देवाद्यातिविषयित्वं [illegible] विशिष्यते। सापि तादृशज्ञानहेतुत्वे भवत्वा ५

प्यजातिमत्त्वविवक्षया निरसनीया। एतल्लाभायैवानुभवार्थकं चरमज्ञानपदम्। एवं चान्वयव्यतिरेकव्याप्त्योः एव
मत्रयोजकत्वेऽपि न क्षतिः। पर्वतवह्निव्याप्यवैशिष्ट्यावगाहित्वनिष्ठयत्तावच्छिन्नकारणताप्रतियोगिकार्यतायावह्नि
व्याप्यवत्पर्वतनिष्ठयत्तावच्छिन्नकारणताप्रतियोगिकव्याप्यविषयकहत्तिकार्यतायावच्छेदिकाजातिः। तत्तन्निः सामा
नाधिकरण्येनावच्छेदिका या जातिस्तद्वत्त्वं वा बोध्यम्। व्याप्तिभानेऽवश्यंभासमानेयस्तादृशानुमितिविषयो धर्म
स्तद्विषयत्वमात्रं वा ग्राह्यम्। योऽयं वित्तद्वानुमितित्वक्रियाद्यपरतद्व्यक्तिसमवेतानुभवत्वात्मन्यत्रानुभवात्मासमवेत
धर्मसमवायित्वं बोध्यम्। अनुभवत्वजातिसंकीकारे तु एतद्व्यक्तिसमवेतस्मरणसमवेतधर्मसमवायित्वमितिव
क्तव्यम्। व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकावच्छिन्नायाविशिष्टपरामर्शत्वावच्छिन्नकारण
ताप्रतियोगिककार्यतासामानाधिकरण्यानुभवत्वव्याप्यजातिमत्त्वं तत्त्वमित्यपि कश्चित्। परे तु पक्षधर्मे तत्सव
पक्षताविशेषणम्। तत्पादपक्षतासहकृतपरामर्शजन्यत्वमर्थः। यथोक्तापादिविशेष्याद्यभावरूपा या वा पक्षता

शि.दी.म.
६

याः पक्षत्वघटितवारणाय परामर्शस्योपादानं। तत्त्वेन जनकत्वमेकावच्छेदेनोभयजन्यत्वं च विवक्षितं तेन बाधादिकालीनेनैवे
वाव्याप्तिप्रभृतिविषयकेण परामर्शेन जन्यपक्षतायाः प्रत्यक्षे तद्भेदप्रमासमूहालंबनेनानातिप्रसंगः। तद्घटमनुभवान
व्याप्यजातिमत्त्वं पायवनाव्याप्तिः एतज्ज्ञानाभावे चरमसाक्षात्परामिन्याद्रुः। तन्निरस्य। लाकरणमिति। न तु व्याप्यादि
ज्ञानजन्यज्ञानकरणत्वेनेतरभेदसाधने व्याप्तिज्ञानत्वाद्यन्यसंवेधेन व्याप्तिज्ञानमेव वा गमकं व्याप्तिरेनुगमे व्याप्ति
कस्य भागासिद्धिवारणमात्रप्रयोजनकत्वादिति वाच्यम्। फलोपहितस्य लक्षणया व्याप्तिज्ञानत्वादेरतिप्रसक्तत्वा
त्। करणत्वनिरूपकाप्रसेत्ता दृशज्ञानत्वत्वाय नवच्छेद्यत्वात्। व्यतिरेकव्याप्तेर्गमकत्वापवे व्यर्थविशेषणकानवकाशा
च्चेति। लिंगस्य नित्यत्वेप्यनुमितिकरणस्य स्वरूपतः प्रसक्तोपजीवकत्वं व्यवस्थापयन्नाह। तच्चेति। अनुमितेर्ज्ञा
नाकरणकज्ञानत्वेन प्रमाणमिति मध्यलिंगविशेषो तत्करणस्यापि प्रत्यक्षमात्रं गतमर्थावः स्यादिति तद्भिरस्यति त
च्चेति। स्वपिके। चिन्ता अनुमानप्रामाण्यपरीक्षितेचार्वाकमनुस्थापयति। अथेति। अनुमानं। अनुमानत्वेनापि राम.
६

मंतं। भूमादिज्ञानं वसत व्याप्त्युपदीतमेव वा। संवादेन। संवादाभिमानेन। संभावितस्यापि तत्तोनुगताकारस्य पारमार्थ्य
मत्वलक्षणमात्रसाहित्यघ्नेणानुल्लेख्यत्वात्। अथ्यक्षमूलकविकल्पोल्लिखितत्वाद्धां संवादः। अनुमानाप्रामाण्ये
च तन्मूलकसमयविरोधापाधीनप्रवृत्तिकयोः शब्दोपमानयोः सुतरामप्रामाण्यात्रास्प्रत्यक्षप्रमाणमित्यर्थः॥ इ
तोन्यादि। अप्रमाणसाधर्म्येण। प्रमाणत्वप्रयोजकरूपशून्यत्वेन। हेतुसाधर्म्यस्य साधर्म्यदर्शनस्य वा। नन्व
मिहितमेवसाधर्म्यदर्शनं संभावनां भावयति। संभावनैव बहुशो व्यवहारहेतुरित्यत आह। अनुमानमिति। ननु तव
यमापातानोन्यमजनकत्वलक्षणमप्रामाण्यं निरूपयामः। किं त्वनुमानस्य विषयबाधाधीनमप्रामाण्यं संभाव्यते
पिपरं तु प्रमाकरणत्वव्यतिरेकमत आह। अपि चेति। स्वतन्त्रस्य न चानुगताकारासंस्पर्शि निःपरमार्थसत्त्वलक्ष
णसाहित्यस्य [redacted] संवेदनसंवेदितप्रामाण्येपि निर्विकल्पकेन प्रामाण्यं संदिह्यते। परं तु तदुत्तरभाविविनि
समुल्लिखितजातीकानुगताकारे सविकल्पएवेति वाच्यम्। निर्विकल्पस्य सन्मात्रावलंबनेन तत्र स्वविषयपक्षप्रामाण्ये

शिरोम.
७

वगाहित्वात्मानुमानाधीनसिद्धिकत्वात्। सर्वमिदं सति व्याप्तिनिश्चये स्यात्तत्सत्वं तु न संभवत्युपायाभावादित्यत आ
ह· व्याप्तीति। समारब्धानुमानप्रामाण्यपरीक्षाकारणीभूतव्याप्तिग्रहोपायप्रतिपादनविदाने व्याप्तिस्वरूपनिरू
पणमारभते· न त्वित्यादिना। साध्याभाववदवृत्तित्वस्य व्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिमाशंक्याह। साध्यवद्भि
न्नेति· साध्यवद्भिन्नेपः साध्याभावः तद्वदवृत्तित्वमर्थः। कर्मादौ संयोगाद्यभाववत्त्वस्य भिन्नत्वेमानाभावादाह। साध्यव
दिति· हेतोः साध्यवत्कृभिन्नवृत्तांनवृत्तित्वेनाप्या [redacted] त्तेराह। सकलेति· साकल्यं साध्याभाववत्ति साध्येयवोध्य
म्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकोवाऽभावोग्राह्यः। तेन विपक्षैकदेशनिष्ठाभावप्रतियोगिनि व्यभिचा
रिणि नातिव्याप्तिः। न वा नानाव्यक्तिकसाध्यकसद्धेतावव्याप्तिः। अव्याप्यवृत्तिसाध्यकव्याप्यवृत्तिसद्धेतावव्याप्तेः
हे· व्याभिचारिणि वा [redacted] व्याप्यवृत्तावतिव्याप्तेर्वारणाय अभावरूपप्रतियोगिव्यधिकरणत्वे चोध्यसा रा.म.
हेत्वभावोपि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणः तत्प्रतियोगित्वं च हेतुतावच्छेदकरूपेणबोध्य ७

म्। तेन द्रव्यत्वादौ साध्ये विशिष्टसत्वादौ नाव्याप्तिर्न वा विशिष्टसत्तात्वादिना तादृशाभावप्रतियोगिनि सत्तादावति
प्रसंगः। पंचैकव्यक्तिकसाध्येत्विपक्षैवात्र च निरुक्तमतव्याप्येतत्त्वेन साध्ये निर्वह्नित्वादौ चाव्याप्तिः। तत्र हेत्व·भा
वस्यरह्यादेः प्रत्येकं यावद्विपक्षावृत्तित्वादतआह। साध्यवदिति। अत्रान्योन्याभावस्य साध्यवत्त्वावच्छिन्नप्रतियो
गिताकत्वं वृत्तित्वं च लक्ष्यम्। वह्निमत्तिनीलोघटादन्य इति। नानीति। साध्यसमानाधिकरणं यस्य पद
धिकरणान। धिकरणं साध्यं तन्नेत्यम्। साध्यनिष्ठसमानाधिकरणप्रतियोगितत्वम्। साध्यनिष्ठाधेयत्वानिरूप
काधिकरणावृत्तित्वमिति यावत्तदनधिकरणत्वमर्थः। साध्यवद्भिन्नस्य च साध्यनिष्ठाधेयत्वानिरूपकत्वात्तद्वृत्तौ
नातिप्रसंगः। साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति
तु निष्कर्षः। तेन सत्तावान् द्रव्यत्वादित्यादौ न दोषः। साध्यवैयधिकरण्ये साध्यवद्भिन्नाधिकरणत्वं चरमाधिक
रणांशिस्यानतिप्रयोजनतया तदुपहाय द्वयमेकीकृत्यानुपदं घटयति। तदुभयमपीति। साध्येत्यादेः साध्यवदधि

शिरोम. ८ कस्यानधिकरणगतस्याभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभावस्यार्थः। न च केवलान्वयिनि। साध्यनिष्ठाधे
यत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिकसाध्यके च एकसाध्यव्यक्तिनिष्ठाधेयत्वानिरूपकत्वं साधनाधि
करणव्यक्तेरस्येत्यव्याप्तिः क्वचिद्व्यभिचारित्वप्रतिव्याप्तिस्वाधेहिमीये च साध्यवैयधिकरण्ये यदि साध्यवत्त्वावच्छि
न्नप्रतियोगिताकोभेदो विवक्षितः तदा केवलान्वयिनि। यदि च यत्किंचित्साध्यवद्व्यक्तिभेदस्तदा नानाधिकरणसाध्य
के सर्वत्राव्याप्तिः। केचित्तु साध्येति साध्यसामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे येन संबंधेन सा
ध्यवद्वृत्तित्वाभावः तदधिकरणभिन्नत्वमर्थः। अतेन धूमस्य स्वावयवे संयोगेन वह्निमति च समवायेनावृत्तावपि
न क्षतिः। तादृशाभावस्य संबंधांतरेणावर्तमानेत्वलभः। व्यभिचारिणस्त्वपि चारनिरूपकाधिकरण एव
तादृशितादृशाभाववत्त्वं सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमित्यनुभवात्। न चैवं विशिष्टसत्त्वेऽव्याप्तिः
। विशिष्टस्यातिरिक्तत्वात्। अनतिरेके तु विशेष्यादिशेष्यसंबंधस्यैव परंपरया व्याप्यत्वात् केवलान्वयिनि वा रा.म. ८

व्याप्तेरभिधानं द्वितीयलक्षणाभिप्रायेणेत्याहुः। तन्न। सत्तायां गुणेन द्रव्यत्वसामानाधिकरण्यमिति प्रतीतिर्हि द्रव्य
त्वे गुणेन पृथिवीत्वसामानाधिकरण्यमिति प्रतीतिवत्तन्निष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्य परंप
रासंबंधेन सामानाधिकरण्यस्य वाऽभावं गुणेऽवगाहते। ननु सत्तायामेव द्रव्यवृत्तित्वाभावम्। सत्ता न द्रव्यवृ
त्तित्वाभाववती द्रव्यवृत्तित्वाभावो न सत्तावृत्तिरित्यादिसर्वजनसिद्धप्रतीतिबाधितत्वात्। बाधकाभावाच्च संयोगतद
भावयोरवच्छेदकभेदेनैकत्र प्रतीत्या तदुभयोरेकत्र सिद्धिः। अतीन्द्रियसाध्यकेऽतीन्द्रियव्यभिचारिण्यतिप्रसंगाच्च। तत्र
सामानाधिकरण्याभावस्य प्रत्यक्षासंभवेनासिद्धेः। न च तदभाववद्वृत्तित्वेन तत्र तदनुमेयम्। तच्चेतद्वृत्तिभिन्नत
स्योपाधित्वात्। किं चेदमिदानीमिति प्रतीतिनियामककालविशेषणताविशेषेण हेतुतायां सद्धेतावव्याप्तिः। येन
संबंधेनाधिकरणे काले तेन संबंधेन साध्यवद्वृत्तित्वविरहिणोऽप्रसिद्धेः। समवायित्वेति। वाच्यत्वं पर्याप्तसम
वायितया वस्तुत्वे। घटादिसमवायितयेत्यर्थ इत्यप्याहुः। प्रमेयसाध्यके च भावत्वेनाभावानाम भावत्वेन भावानां

शिरोम.
९

वृत्तित्वेन निर्वह्नावृत्तिमावृत्तिगगनत्वादिना विरुद्धघटत्वपटत्वाभ्यां च प्रमेयमात्रस्याभावः सुलभः॥ ॥ननु पा
रिभाषिकमेवाव्यभिचारित्वम्। तथाहि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियो
गिताकाः यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम्। सर्वत्र वाच्यत्वाद्यभावस्य तथात्वात् तावत्त्वोपादाने
अत एव मूर्त्तत्वमूर्त्तत्वोभयवान् मूर्त्तत्वोभयवान्मूर्त्तत्वादित्यादौ द्वित्वाद्यवच्छिन्नाभावस्य प्रतियोगिसामानाधिक
रणेऽपि भिन्नतत्त्वमेनान्यत्वाभावस्यातथात्वान्नातिप्रसंगः। साधनसमानाधिकरणस्य गोत्वाद्यभावस्य तत्र त्वा
ध्यव्याप्याभावस्य चातथात्वात् साध्यतावच्छेदकेत्यादि। येन संबंधेन हेतुस्तेनैव तदधिकरणत्वं बोध्यम्। तेन
स्वान्यत्वे साध्ये समवायेन हेतौ तन्निष्ठविषयतत्ताधिकरणे घटादौ वर्त्तमानस्य साध्याभावस्यातथात्वेऽपि न क्षति
ः। एवं द्रव्यत्वे रूपादिसंबंधे भेदे च संबंधेनोदोषः संबंधैकादिवृत्त्या निरसनीयः। रूपादिसामान्याभावे साध्ये पृथिवी
त्वादिकं सद्धेतुरेव। प्रलयेपरमाणुषु त्रिकालेऽघावयविनितकत्वात्। न च प्रतियोगिवत्त्वं सप्राग्भावोऽस्य

राम.
९

नाभावविरोधित्वं॥ मानाभावात्। अत एवांशतः प्यामेरक्तेरूपेनास्तीति प्रत्ययः। नैवेष रक्तिमत्त्वं साधयवगाह॥
सर्वोपरक्तिमत्त्वं स्याभावविरक्तेऽपि तथा प्रत्ययप्रसंगात्। तत्सामानाधिकरण्यं स्वविशिष्टहेत्वधिकरणा
वच्छेदेन बोध्यम्। तेन गोत्वजन्यद्रव्यत्वप्रलयावृत्तित्वादिना गवादेरभावस्य गवाद्यनधिकरणधर्म्यवच्छेदेन तद
तिकाले महाकाले वावृत्तावपि यद्गोत्वं तद्गोः सत्त्वकालत्वं तत्तज्जन्यद्रव्यं प्रलयावृत्तित्वं तत्रादौ न्यादो नाति
प्रसंगः। हेतुमति प्रलये तत्सामानाधिकरण्याभावात्। स्वविशिष्टेति। विशेषणात् कपिसंयोगाभाववानेत
त्वादित्यादौ संयोगात्मकस्य साध्याभावस्य सकलदेहत्वधिकरणवृत्तित्वेऽपि नाव्याप्तिः। जलादिवृत्तित्वादि
विशिष्टगोत्वाभावाभावस्य जलत्वाद्यभावेन तु धूमाद्यभावः। जलादावपि तदभावप्रत्ययप्रसंगात्। यत्स
मानाधिकरणानां साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां यावदभा
वानां प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं तत्त्वं वा। ज्ञेयत्वात्त्वादिना वाच्यत्वादीनामभावः सुल

शिरोम०
९०

मएवेति। शेषं दर्शितदिशावसेयमित्यत्रस्वाहा। प्रतियोग्यवृत्तित्वेति। केचित्तु व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य
साध्याभावस्य प्रतियोगिता या स्वानवच्छेदकं हेतुसमानाधिकरणस्य व्याप्यवृत्तेः प्रतियोगिव्यधिकरणसाध्या
ऽभावस्य प्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकं वा यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं
व्याप्तिः। एवं च व्याप्तेरव्यभिचारसंबंधरूपतापि संगच्छते। हेतोः साध्यतावच्छेदकावच्छिन्नसाध्याभाववद्वृत्ति
त्वस्यैव साध्यतावच्छेदके हेतुमन्निष्ठसाध्याभावप्रतियोगितावच्छेदकत्वस्यापि व्यभिचारत्वात्। [redacted] स्य वच्छेदकत्वे
हेतुमत्यप्यधिकरणत्वं। तेन विशिष्टवत्त्व्यभावस्य हेतुत्ववह्नित्वोभयवह्निभावस्य च प्रतियोगितावच्छेद
कत्वेपि वह्नित्वस्य न क्षतिः। सत्त्ववान् गुणादौ संयोगाद्यभावो विव्याप्यवृत्तिर्वंसमानो वा प्रतियोगितावच्छेद
कानतिरिक्तवृत्तित्वमेव तदवच्छेदकत्वमिहापि बोध्यम्। भवति च गुणत्वगुणवृत्तित्वद्रव्यमात्रसमवेतत्वाघव

राम०
९०

दकीवह्नित्वावच्छिन्नोवह्निरितिभवत्यव्याप्तिः साधनेति। वैयधिकरण्यं तदनधिकरणं तदनधिकरणवृत्तित्वं तच्च केवला
न्वयिनः साधनस्याप्रसिद्धमिति प्रसंजकेच पृथिवीद्रव्यत्वादिसाधाद्यावतः समानाधिकरणपदोपादानं धूमादेरपिव
ह्न्यादिसमानाधिकरणद्रव्यत्वाद्यनधिकरणवृत्तित्वमतोयावदिति। यद्यपि पृथिवीत्वादिसमानाधिकरणघटत्वपर
त्वपटत्वानधिकरणवृत्तित्वं द्रव्यत्वादेस्तदनधिकरणमात्रवृत्तित्वं च निखिलपटघटादिरूपादीनां तथापि तादृशधर्मानधिक
रणमात्रवृत्तित्वावच्छेदकं रूपत्वादिकं धूमत्वादिकं तु वह्निसमानाधिकरणयोगोलत्वाद्यनधिकरणमात्रवृत्तित्वावच्छे
दकं तदवच्छेदकत्वं च तदनतिरिक्तवृत्तित्वमात्रं च तत्वधूमत्वधर्मावृत्तित्वं। तेन प्रमेयत्वसमानाधिकरणगुणत्वाद्यनधि
करणमात्रवृत्तित्वानधिकरणगगनादिवृत्तित्वेपि द्रव्यत्वस्य द्रव्यसाध्यकप्रमेयत्वादौ नातिप्रसंगः। वस्तुतस्तादृ
शधर्मानधिकरणमात्रवृत्तित्वावच्छिन्नाधिकरणताकत्वं तदवच्छेदकत्वं वाच्यं। तेन सत्ताद्रव्यत्वोभयवान् गुणत्वा
विशिष्टसत्तावानित्यादावपि सत्त्वात्तत्र स्यादौ नातिप्रसंगः। सत्तायां गुणत्वाभाववद्द्रव्यमात्रवृत्तित्वविरहेप्युभयत्वाद्यवच्छि

शिरोम॰ न्नाधिकरणतया गुणान्यत्वाभाववन्मात्रवृत्तित्वात्तथा प्रमेयत्वादेरिति। न तु व्यतिरेकित्वेन धर्मो विशेषणीयः। वस्तुत
१६ स्तु यावत्पदं तादृशस्य कस्यापि न वैयधिकरण्यावच्छेदकमेतावन्मात्रं स्फोरणाय। तथा च साधनसामानाधिकरण
धर्मनिरूपितवैयधिकरण्यावच्छेदकं यावद्द्वित्वधर्मवत्त्वाया वत्तादृशावच्छेदकत्वमन्यधर्मवत्त्वावासमं सामाना
धिकरण्यमिति पर्यवसितं न मतो दोषांतरमाह। महानसादाविति। तथा च तदनधिकरणत्वं तदभावाधिकरणत्वं
वा हृदमपि दुष्टमित्यर्थः। एतेन तदधिकरणवृत्तित्वमत्र वैयधिकरण्यमिति निरस्तं।। समवायितया महानसवृत्तित्वं
वह्नेर्नास्तीत्यादिप्रतीतेर्वह्न्यादेरपि तादृशवैयधिकरण्याधिकरणत्वात्। संबंधविशेषेण वैयधिकरण्यविवक्षायां तो
क्तदोष इति ध्येयम्। उपाधिपदस्य साध्यसमव्याप्तवचनतया व्याप्त्याश्रयप्रसंगादत आह। साध्यव्यापकत्व इति। व्याप्ति
निरूपकत्वं व्यापकत्वमात्माश्रयादिग्रस्तमत आह। तद्वृत्तीति। यत्रोपाधिरव्याप्यवृत्तिर्नानाव्यक्तिको वा तत्रापि व्या राम:
प्यवृत्तिरखंडस्यानंतत्तद्व्यक्तित्वप्रकारकप्रमाविषयत्वाभावादिरेवास्तिप्यदि च तस्यापि विशेषणांतरविशिष्टस्यदितात्प १६

वच्छिन्नस्य वा तत्राभावसंभवस्तदा साध्यसमानाधिकरणान्यतमाभावाप्रतियोगितानवच्छेदकीभूतसाधनसामानाधिकर
ण्यान्यतमाभावप्रतियोगितावच्छेदकधर्मवत्त्वेदलद्वयार्थो बोध्यः। अनेन च स्यानिरसनुमाह। प्रतियोगित्वमिति। एकेति
एकदेशकालावच्छेदेनेति प्ररणीयं। तेनाव्याप्यवृत्तेरभावस्य प्रागभावादेश्च प्रतियोगितायां नाव्याप्तिः। अन्योन्ये
ति। अत्र समवायादिसंबंधावच्छिन्नप्रतियोगिकाभाववति महानसादौ संयोगेन वह्न्यादेर्वृत्तेः येन संबंधेनाभावस्ते
नावृत्तिर्विवक्षिता। इत्यं येन संबंधेनासंबद्धत्वोक्तौ न दोषः। अन्योन्याभावस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकतया त
द्वृत्तिनेन संबंधेन प्रतियोगिनोः संबद्धत्वात्। परं तु सत्तायाः समवायेनाभावस्य प्रतियोगितायामव्याप्तिः। तद्वृत्तिसम
वायेन वृत्तेरप्रसिद्धेः तादृशास्वसंबद्धाधिकरणावृत्तित्वाभिधाने च व्यधिकरणसंबंधावच्छिन्नाभावप्रतियोगिता
यामव्याप्तिः सिद्धांतलक्षणवत्समाधानीत्या रवंडशः प्रसिद्ध्या तत्परिहारो पातिध्येयम्। अभावविरहात्मत्वमिति।
नचान्योन्याभावप्रतियोगितावच्छेदकयोरप्रसक्तानिप्रसक्तौ प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्षणत्वेनलक्षणे:

शिरोम॰ ताभावपदवैयर्थ्यं सर्वत्र नित्यस्यानित्यसाधारणरूपावच्छिन्नस्य वोपाधिता संभवात् । इतरथा तु भेदप्रतियोगितावारणा
१२ य संसर्गाभावपरतया तस्य सार्थकत्वादिति वाच्यम् । विरहपदस्य तद्‌ग्रहप्रतिबंधकज्ञानविषयार्थकत्वात् । प्रतिबध्य
ति हि तादात्म्येन प्रतियोगिज्ञाने अन्योन्याभावबुद्धिं प्रतिबंधकत्वं चात्रैकालावच्छेदेन एकत्रावच्छिन्नमानत्वमभावप
रत्वं च स्वाभावपरत्वात् । तत्तत्कालिकसंबंधावच्छिन्नायास्तत्समानाधिकरणाभावप्रतियोगितायाः अनवच्छेदकमपि भ
वति वसंबंधांतरावच्छिन्नायास्तस्या अवच्छेदकमतो यत्संबंधावच्छिन्नायाः साध्यसमानाधिकरणाभावप्रतियोगितायाः अ
नवच्छेदकं यत्तत्संबंधावच्छिन्नायाः एव साधनसमानाधिकरणाभावप्रतियोगितायाः अवच्छेदकं न हि वाच्यम् । तथा च संसर्ग
भाववत्त्वमनुपादेयमेव । वाशब्दोऽस्वरसस्सूचनाय । स च व्यधिकरणसंबंधेन सर्वस्य प्रतियोगिनः तादृशप्रमेयाभावाभावात् ।
स्वाभावसंबंधित्वस्य स्वाभावज्ञानविषयत्वस्य वा सर्वत्र लघोः संभावितत्वात् । स्वाभावे च वैयर्थ्यं प्रतियोगितायाश्चे रम॰
यात्तत्त्वस्वरूपसंबंधस्यैव शरणीकरणीयतया तस्यैवावश्यकत्वेन तथात्वोचितत्वात् । अभावत्वप्रतिबंधकतयोः प्रति १२

योगिघटितत्वात्तथाविधव्यवहारगोचरत्वस्यापि विना प्रतियोगितां निर्वक्तुमशक्यत्वाच्च । यत्साध्यसा॰ यत्समा
नाधिकरणसाध्यस्य । तथा हि स्यादि । यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं यावत्साध्यसमानाधि
करणसाध्यस्य । तथा हि स्यादि । यत्समानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं यावत्साध्यसमानाधिकरणसं
ताभावप्रतियोगितावच्छेदकं साध्यसामानाधिकरणात्यंताभावप्रतियोगितावच्छेदकं वा यावत्तत्समानाधिक
रणात्यंताभावप्रतियोगितावच्छेदकं साध्यसाजात्यमित्यर्थे तु नोक्तदोष इति ध्येयम् । प्रतियोगितायोरेकसंबंधाव
च्छिन्नत्वविशेषणतानाविशेष्यावच्छिन्नत्वं वा वक्तव्यम् । तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किंचित्संबंधावच्छिन्न
साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि एकसंबंधावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियो
गितानवच्छेदकस्य संबंधांतरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः । व्यभि
चारिणि तु यत्राधिकरणे व्यभिचारो विशेषणतानाविशेष्यावच्छिन्नतन्निष्ठात्यंताभावप्रतियोगितावच्छेदकं अतो ना

शिरोम· १८

तिप्रसंगादिति। वस्तुतो हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावत्तद्धर्मावच्छिन्नसमानाधिकर
णान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्मावच्छिन्नसमानाधिकरणत्वम्। साध्यसमानाधिकरणान्योन्याभावप्रति
योगितानवच्छेदकं यावत्तत्समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयम्। साध्य
मिति। यावंतो तेषामित्यर्थः। दूषितं। केवलान्वयिन्यव्याप्त्या। सा च यथोक्तलक्षणापि गौरवं परमिति स्थितं तदिति। का
र्त्स्न्यं साधनस्य साध्यस्य साध्याश्रयस्य साध्यसमानाधिकरणस्य साधनाश्रयस्य साधनसमानाधिकरणस्य वाश्र
ये हेतुत्वसाधनसामानाधिकरण्यं साध्ये हेतुत्वं तु साधने तु साध्यसामानाधिकरण्यं वार्थः। प्रथमे एकेति नानेति।
व्याप्तिश्वा हेतुहेतुत्वं पृथिवी पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च। अत एवेति नेतरः। अर्थाभिधानमपूर्वकं द्विती
येनिरस्यति। अत एवेति। अत एवैकव्यक्तिकसाध्यकाव्याप्तेरेवा। विषमव्याप्तेः समव्याप्तेपि संख्यापरिमाणादावेकत्र
साधने सकलसाध्यसंबंधस्याभावात्। भावाश्च शब्दवान् द्रव्यत्वादित्यादौ तत्तौ येसाध्याश्रयत्वं यावद्वृत्तित्वं। तेनैव च साध्यस राम १८

मानाधिकरण्यावत्सामानाधिकरण्यमित्यर्थः। अत्र च यथासंभवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धूमादावव्या
प्तिरतिव्याप्तिश्चेत्यसत्त्वादोषो। अर्थपरिष्कारमपूर्वकं पंचमं निरस्यति। नचेति। एकमात्रवृत्तिसाधनेऽव्याप्तेश्च। तेनैव च षष्ठं नि
रस्यति। नापीति। तादृशानां सर्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामानाधिकरण्यानि न कुत्रापि वह्नौ। अथ
यद्धर्मावच्छिन्नसाध्यसामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्मावच्छिन्नसामानाधिकरण्यं
विवक्षितमिति चेद् द्वितीयेपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धांतयि
ष्यत इति। अविनेति। साध्यं विना साध्याभाववति यो भावो वृत्तिस्तद्विरहः। साध्यं विना भावः साध्याभावव्यापकीभूताभा
वप्रतियोगित्वमिति वा। अन्येति। संबंधः सामानाधिकरण्यम्। व्यभिचारिसंबंधस्य केनचित्किंचिद्रूपावच्छिन्नेन धू
मादेरपि द्रव्यत्वादिना वह्निव्यापकत्वात्। तद्दोषादिति। न च व्यभिचाराग्रहसहकृतत्वं तद्दोषस्य त्वया। व्यभिचारतद्व्यति
रेकयोरनुपस्थितावपि समानाधिकरणधर्मवत्त्वज्ञानमात्रादनुमितेस्तु तादृशस्य सर्वानुभवसिद्धत्वात्तादृशत्वं तत्रैव

शि॰ रो॰ म॰ च रूपांतरेण व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामानाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयिता
१९ वच्छेदकत्वमुचितम्। न च व्यभिचारसंशयेऽनुमित्यनुत्पादाद्व्यभिचारनिश्चयत्वेन कारणत्वोक्तौ गौरवम्। व्यभिचारज्ञा
नस्य भ्रमत्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य तद्विरोधित्वकल्पनम्। अव्यभिचारनिश्चय
स्य भ्रमत्वशंकायामप्यनुमितिजनकतया भ्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तवैव गौरवात्। नानाविधव्यभिचा
रज्ञानाभावानां नियतपूर्ववर्त्तित्वेन क्लृप्तानामपि हेतुत्वमपेक्ष्य एकस्यैकविधाव्यभिचारज्ञानस्यैव हेतुत्वमुचितमि
त्यपास्तम्। सामानाधिकरण्यविशिष्टस्य पक्षधर्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति। केवलान्वयितस्याग्रहे सामा
नाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोपि वाच्यः। न च वह्निमद्वृत्तित्वाभावप्रतियोगित्वादिकं अन्योन्याभावप्रति
योगितानवच्छेदकत्वं वा। तथा च सर्वसाधारण्यात् लाघवात् साधनवन्निष्ठत्वं तस्य वा वह्नेरन्योन्याभावस्य वा विशे राम॰ १९
षणत्वमुचितमिति सिद्धान्तरहस्यम्। एवं केवलान्वयिनि त्वदुक्तेन संभवः। प्रतियोग्यसमानाधिकरणत्वादि। प्रतियोग्यसमा

नाधिकरण्यद्वयविशिष्टसामानाधिकरण्यं तत्ताभावप्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेन येनकेनापि
समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्मावच्छिन्नया वह्निरूपिता व्याप्तिरित्यर्थः। तथा च साध्ये परंपरासंबंधेन द्रव्यत्वा
दिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः। इत्थं चेदं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादि
निष्ठान्योन्याभावप्रतियोगित्वेपि द्रव्यत्वादेर्नाव्याप्तिः। साधनस्य विशिष्टसत्त्वादेर्गुणादाववृत्तेः। सामानाधिकरण्य
घटकीभूतं भेदेपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्यमपेक्षितं रेकम्॥ वस्तुतस्तु भ्रमत्वादिविशिष्टव्या
पकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वात्। धूमत्वादिमति तादृशसामानाधिकरण्यं न इति धूमत्वादिकं
वा व्याप्तिराघाभिन्नाह्नितोपान्वभिन्नेचेति ध्येयम्॥ अयं कपिसंयोगी एतद्वृक्षत्वादित्यादि संयोगस्य समानाधिकर
णं तु। यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्संयोगस्य स्वाश्रयावच्छेदेन हेतौ वृत्तत्वावच्छेदेन सामान्या
भावहेतोरविरोधाभावात्। तत्र चान्तरिन्द्रियस्यापि संयोगस्य सत्त्वात्। परितः प्रतियोग्युपलक्षणैर्व्याप्यवृत्तेः हेतुः संयोगइतिनाथ

शिरोम. कृमिति। तन्न। दुग्धे संयोगसामान्याभावेनानाभावात्। न च यो यदीयपर्याप्तविशेषाभाववान् स तत्सामान्याभाववानिति व्या
२० प्तेर्यावत्संयोगाभावाप्रमानम्। यत्र द्रव्ययोरनुगमान एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च। एतेनाप
संयोगसामान्याभाववत्त्वाद्यावत्संयोगविशेषाभाववत्त्वादि निरस्तम्। व्यर्थविशेषणत्वात्। अप्रयोजकत्वात्
निर्गुणत्वादेरुपाधित्वाच्च। न च प्रतियोग्यनवच्छेदकत्वमेव द्रव्यत्वादेरभावावच्छेदकत्वे॥ गुणघटवत्त्वच्छेदकधर्मे यत्वादे
स्तदभावावच्छेदकत्वप्रसंगात्। यथा च घटसर्ववृत्तित्वस्य प्रतिदंडे वह्निसामानाधिकरण्यस्य चाप्रति धूमे भिन्नत्वेपि दंडत्वं
धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति संप्रदायः। न
वीनाः। तु नहन्यन्तिकालावच्छेदेन घटादौ गुणस्य प्रत्यक्षावच्छेदेन च गगनादौ संयोगस्य सामान्याभावो वर्त्तते तथा धूमव
त्यपि विरहो दृष्ट न स्यादृहंस नित्यं वेदृताशानो न शिखरे इति प्रतीतेः। संयोगेन द्रव्यस्याव्याप्यवृत्तित्वात्। [illegible]
[illegible]। वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्वस्यावश्यकत्वा [illegible] भावितत्वाच्च। एवं प्रतियोगिमतोऽपि देश रा.म. २०

पर्वते२

काल देशयो

व२

मेदावच्छेदेन तदभाव इति तन्न साध्यकाव्याप्तिवारणाय तत्तन्नोपादेयं सर्वथैवाव्याप्यवृत्तिसाध्यके साध्यसाधनभेदेन
व्याप्तिभेदादिति वदन्ति। प्रतियोग्यसमानाधिकरणं प्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरणं तेनायं गुण
कर्मान्यत्वविशिष्टसत्ताभावाद् ज्ञातिमत्त्वात् भूतत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिप्रसंगः। न चोभयत्वमेक
विशिष्टापरत्वं विशिष्टं च केवलादन्यदिति तदभावो मनसि सत्त्वज्जन एव प्रतियोग्यधिकरणवृत्तिरिति वाच्यम्। उभय
त्वे हि न विशिष्टत्वादनतिरिक्तं न वा तत्स्वच्छिन्नाभाववत्त्वे स्वच्छिन्नाभावान्तवैशिष्ट्यविरहे घटत्वपटत्वयोरुभयत्व
स्य उभयत्वेन तदभावस्य च प्रमाणसिद्धत्वात्। न च तत्र व्याप्तिरेव उभयत्वाधिकरणमूर्त्तत्वस्य मनसि सत्त्वादिति
वाच्यम्। तथात्वेप्युभयत्वेन रूपेण तेषामसत्त्वात् नातोभयथापि तिप्रसंगे ईदृशत्वात्। अत्र तत्पदं वा तेनाभावत्व
निरूपकप्रतियोग्यसमानाधिकरणस्यासत्ताभावत्वनिरूपकप्रतियोगितावच्छेदकत्वाभावात् अन्यथा सर्वस्यैवा रा.म.
भावस्य समानाधिकरणाभावान्तरमिश्रत्वात्। तदेदस्य च स्वरूपानतिरिक्ततया प्रतियोग्यसमानाधिकरणस्यैव

शिरो म॰ २१

दुर्लभत्वापत्तेः सर्वेषामेवाभावानां हेतुसमानाधिकरणात्यंताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावोत्तरा
त्मकस्वभेदप्रतियोगित्वादभावसाध्यकाव्याप्तेश्चेति संप्रदायः अथ यत्र गगनत्वं तद्गगने ऽस्त्वति व्याप्तिः फलपस्य गो
ध्वंसवत्त्वेन गवात्यंताभावानधिकरणत्वात्। संसर्गाभावमात्रे क्वापि यदा स्पंदः तदा द्व्यणुकं च हा ऽ दृष्टं तदाज
न्यज्ञानं दुःखं वा यदा तत्स्यादृष्टं तदा तदीयेज्ञानमित्यादावतिव्याप्तिः द्व्यणुकत्वादेर्द्व्यणुकादिभूमन्यत्वेऽ प्रलयानि ष
ध्वंसप्रागभावप्रतियोगितानवच्छेदकत्वात्। न हि तयोः सामान्याभावमतेपि एकविशेषप्रागभावविशेषांतरध्वंस
वत्त्वपि समये सामान्यावच्छिन्नध्वंसप्रागभावयोः संभव इति चेत्। न। प्रतियोगिमत इव ध्वंसादिमतोपि कालस्यात्य
न्ताभाववत्त्वेपि विरोधाभावात्। अत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसंगात्। उयात्तु विशेषोपदेकस्य दे
शेनावच्छिन्नं तयात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव काले देशस्यावच्छेदकत्वात् तच्छून्यकाले च
तदभावस्य प्रतियोग्यधिकरणत्वात्। न च संसर्गाभावविशेषोऽत्यन्ताभावः संसर्गाभावत्वं च संसर्गारोपजन्यप्रती राम॰ २१

तिविषयाभावत्वरूपं जन्यतावच्छेदकनियमघटितमिति वाच्यम्। तद्धेन्यावृत्तित्वरूपनियमस्य तत्र घटकत्वात् तद्वृत्ति
यमांतरस्याप्यत्र प्रवेशेपि न क्षतिरित्यादुः अवसेते च नियमाघटितमेव संसर्गाभावादिलक्षणमनुपदमेव विवेच
यिष्यते संसर्गाभावत्वप्रवेशे प्रयोजनविरहोऽव्याप्तिश्च। अथ ज्ञानवान् द्रव्यत्वाद्विशेषगुणवान् मनोन्यद्रव्यत्वा
द्वएवं नियमांतरस्याप्यत्र प्रवेशेपि न क्षतिरिति तज्ज्ञातिमात्रभावत्वादित्यादौ समवायेन ज्ञानादेः साध्यतायामतिव्या
प्तिः साध्यस्य नानामपिहि हेतुमतो विषयत्वविशेषणेनैकार्थसमवायेः साध्यवत्वात् मैवं। प्रतियोगितावच्छेदकसंबं
धेन प्रतियोगिनो यदधिकरणं सेवेधिवातत्वद्वृत्त्यात्यन्ताभावस्यैवोक्तत्वात्। भवति चैवमन्योन्याभावोपि प्रतियोगिसमा
नाधिकरणः। नहि विशिष्टसत्त्वहेत्वधिकरणवृत्तित्वं वाच्यम्। तेन नाव्याप्यवृत्तिसाध्यकासंग्रहः। न हृद्. विभिन्नत्वं च ना
र्थः अव्याप्यवृत्तिसाध्यकेव्यभिचारिण्यतिप्रसंगात्। अत्र च सामानाधिकरण्यवतो न तदभाववत्त्वमात्र मोतेरन्यथो
पपादितत्वाद्विमस्वरसात्प्रतियोगिवैयधिकरण्यस्यादिविशेषणं सन्नतिः। नच हेत्वधिकरणेनाध्यम्। प्रतियो

शिरोम॰ २१ ग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावे निरुक्तस्मरभावतात्पर्यनिष्कर्षः। नन्तु प्रतियोगितावच्छेदकावच्छिन्नयस्यस्यक
स्यचित्तत्साध्याभावस्य वा प्रतियोगितावच्छेदकयत्किंचिद्वच्छिन्नस्य वानधिकरणमुक्तम्। आद्ये अव्याप्यवृत्ति
साध्यकाव्याप्तिरेकप्रतियोग्यधिकरणस्यापि तद्धर्मावच्छिन्नानधिकरणत्वात्। द्वितीये संयोगसामान्याभाववान् द्र
व्यत्वाभाववान्सत्त्वादित्यादावतिव्याप्तिः साध्याभाववतो द्रव्यस्य तत्प्रतियोगिसंयोगविशेषाभाववत्तान्नि
त्सत्वादिविशिष्टद्रव्यत्वाभावात्मकप्रतियोगिनो अधिकरणत्वाच्च। स्वाभावाभावाभावात्मकस्य विशिष्टस्यापि
द्रव्यत्वस्य द्रव्यत्वातिरेकात्। तृतीये कपिसंयोगाभाववान् सत्त्वादित्यादावव्याप्तिः। साध्याभावानां कपिसंयोगा
नां गुणानामधिकरणस्याप्यात्मनस्तत्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वात् मैवं।
यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तदवच्छेदस्योक्तत्वात्। अत्र च यादृशसामानाधि
करण्ये हेतोर्यादृशः संबंधः प्रविष्टस्तेन संबंधेन यो हेतुमान् तत्र वर्तमानत्वमभावस्य साध्यस्य च यादृशः संबंधस्त रामः २२

त्संबंधावच्छिन्नाया अप्रतियोगिताया अनवच्छेदकत्वं बोध्यम्। तेन धूमसमवायिनिष्ठाभावस्य संयोगावच्छिन्नप्रतियो
गितायाः धूमसंयोगिनिष्ठाभावस्य तु समवायावच्छिन्नप्रतियोगिताया अनवच्छेदकत्वेपि वह्नित्वस्य न क्षतिः। यद्वा॰
साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधित्वं हेतुमतो बोध्यम्। तथा च संबंधभेदेन प्रतियोगिताया न विशेषणापा॰
एवं स्थिते सामानाधिकरण्याद्यौ संबंधित्वं निवेशनीयं न त्वधिकरणत्वं। तथा च धर्मिणोर्व्याप्यत्वं व्यापकत्वं च निर्वहति॥
तथा हि तादात्म्येन संबंधेन धूमवतः संबंधिनि महानसे वर्तमानो योन्योन्याभावस्तस्य तादात्म्यसंबंधावच्छिन्नाया प्र
तियोगितायास्तदनवच्छेदकवह्निमत्त्वावच्छिन्नस्य वह्निमतस्तादात्म्येन संबंधिनि महानसे धूमवतस्तादात्म्येन संबंधित्वम्।
एवं धर्मिणोपि धर्म्यव्याप्यत्वव्यापकत्वे बोध्ये अत एव ऊलादीनां दृष्टिवीत्वाभावव्याप्यत्वं नवतवीकं संगच्छते। यथा
च यादृशेन संबंधेन हेतोर्व्याप्यता गृहीता तादृशेन संबंधेन तत्स्वपक्षविशिष्टज्ञाने यादृशेन संबंधेन साध्यस्य व्यापक
त्वमवगतं तादृशेनैव साध्यविशिष्टपक्षानुमितिस्तेन न धूमावयवे संयोगेन वा समवायेन पर्वते वह्निधीस्तथैव

शिरोम. २३

वगत व्यापकताघटकसंबंधेन व्यापकस्याभावग्रहे गृहीतव्याप्यताघटकसंबंधेन व्याप्यस्याभावः सिध्यति। कथमन्यथास
मवायेन वह्निविरहिणि महानसे संयोगेन। संयोगेन स्वावयवे वह्निविरहिणि धूमः समवायेन न निवर्तते। निवर्तते
च संयोगेन वह्निविरहिणि स्वावयवे संयोगेनेति नियम उपपद्यते। तथा च तादात्म्यसंबंधेन गोत्वादीनां व्याप्यत्वग्रहात्
व्यापकनिष्ठस्य तादात्म्येनैव तेषामभावः सिध्यति स एव चान्योन्याभावः। इत्थमेव च तादात्म्येन वृक्षः शिंशपायो व्यापि
निम्बस्य इति संगच्छते। अत एव च गोत्वताग्रहदशायां यत्र सास्नादिः सा गौरिति तादात्म्येन गोव्यापकत्वग्रहे सास्नादिमा
तादात्म्येन गोः तादात्म्येन गोर्व्यतिरेकाद् सास्नाव्यतिरेकः सिध्यति। एवं च संयोगेन गगनादेरपि द्रव्यत्वादिव्यापकत्वम्।
वृत्तिनियामकसंयोगमात्रस्याभावप्रतियोगितावच्छेदकसंबंधत्वे साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिताभि
धाने वा पृथिवीत्वादिव्यापकत्वमपि तदभाववतोपि पृथिव्यादेः संयोगेन तत्संबंधित्वात्तद्विरपि तस्य तेष्येव। न तु वृत्तिनिया
मकसंबंधेन। तेनासंबंधित्वात्तदव्यापकत्वात्। व्यक्तीभविष्यति चेदमुपरिष्टात्। नन्वेवं द्रव्यातिरिक्तव्यात्मककालमा रा.म. २३

वृत्तिधर्मस्य विशेषणतावि शेषेणाव्याप्यवृत्ति किमपि व्यापकं न स्यात्। तत्तावच्छेदकसंबंधेन यत्प्रतियोगिसंबंधितदन्यत्व
स्य च कालिकेऽसमानस्याभावस्य प्रतियोगितायां तत्संबंधावच्छिन्नत्वस्य तेन संबंधेन यत्प्रतियोगिसंबंधितदन्यत्वस्य च
कालिकेऽसंभवात्। न च तादात्म्यसंबंधेन हेतुत्वविकरणीभूतयत्किंचिद्व्यक्तिवृत्तिप्रतियोगितावच्छेदकविशिष्टप्रतियोगिसा
मान्यकत्वेव कैव्यम्। तथा चावृत्तिगगनाद्यभाववद्वादिकैव तत्स्य सिद्धेः। सत्ताद्यधिकरणकर्मादौ समवायेन ज्ञानसामा
न्यस्य संयोगसामान्यस्य चावृत्तेर्नातिव्याप्तिः। अतत्वम् तत्र त्वोभयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तात्वविशिष्टा
दिकं च न मनोगुणादिवृत्ति। संयोगसामान्यं च किंचिद्वृत्त्यावृत्तीति वाच्यम्। विशिष्टस्यानतिरिक्तत्वात्। समवयेन ज्ञा
नेः साध्यत्वे मेयत्वादावतिव्याप्तेः। जातिमद्भिन्नत्वादौ साध्ये प्रतियोगितायां जातित्वेनानवच्छेदात्। जातिमत्त्वे च ता
दृशसंबंधेन वृत्तेरप्रसिद्धेः। संयोगादिसाध्यकगुणकर्मान्यत्वादावतिव्याप्तिश्च। अत्र द्रव्ये हेतुमति तादृशसंबंधेन वृ
त्तेरप्रसिद्धेः। द्रव्ये च संयोगादेरपि वृत्तेः। मैवम्। साध्यतावच्छेदकसंबंधसामान्ये निरूपकप्रतियोगीप्रतियोगिकत्वे

धिकरणी भूतयत्किंचिद्व्यक्त्यनुयोगिकत्वसामान्योभयाभावस्यविवक्षितत्वात्। भूतसंयोगेवृत्त्यधिकरणयोगोल्ल का
नुयोगिकत्वस्यैवान्यत्वविशिष्टेनदंडसंयोगेदंडाधिकरणेचेत्तानुयोगिकत्वस्यगुणकर्मान्यत्वविशिष्टसत्तासमवा
येजात्याधिकरणगुणगुणकर्मानुयोगिकत्वस्यविरहात्तातिप्रसंगः। स्वरूपसंबंधेनगगनादेर्वृत्तिमत्वेतुनिरुक्त
प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्येयत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावस्तेनसंबं
धेनतद्धर्मावच्छिन्नस्यव्यापकत्वंवाच्यम्॰ समवायसंबंधेनमेयसामान्याभावस्यसामान्यादौसत्वान्मेयत्वादेरव्याप्त्यभा
वप्रतियोगितावच्छेदकत्वंसुलभम्। अतएवसमवायस्यैकत्वेनद्रव्यादिप्रतियोगिकत्वगुणाद्यनुयोगिकत्वोभयवत्वे
पिद्रव्यंजातेरित्यादौवह्निधूमोभयवान्पर्वतेहेतुरित्यादौसंयोगस्यह्रदत्वावच्छिन्नप्रतियोगिकत्वविरहेपिचनातिव्याप्तिरित्य
पिवदंति। प्रतियोगित्वादिकंतुसंबंधविशेषेणसंबंधत्वेनविशिष्टसामानाधिकरण्येपिसंबंधः संयोगत्वादिनैवनिविश्य
ते। दर्शितंचविषयमाघटितेसंबंधत्वंस्वभाववत्वेचेदमिह्। नास्तीदमिदंनभवतीत्यादिप्रतीतिनियामकोभावाभावसाधारणः

स्वरूपसंबंधविशेषोऽतोनाभावसाध्यकव्यभिचारिण्यतिप्रसंगः। तदपिचानोपादेयम्। प्रयोजनाभावात्। विषयतात
त्वादिवत्प्रतियोगित्वाधिकरणत्वसंबंधत्वतत्वादृयोव्यतिरिक्ताएवपदार्थाइत्येकदेशिनः॥ नत्ववच्छेदकत्वमिहन
स्वरूपसंबंधविशेषः संभवतिचलयोर्धर्मैगुणैतदभावात्प्रमेयधूमत्वंकंबुग्रीवादिमत्वप्राणात्वलघुगुणत्वादेर
न्यत्वेनतेनरूपेणसाध्यतायांव्यभिचारिण्यतिप्रसंगात्त। नाप्यनतिरिक्तवृत्तित्वंप्रतियोगितायाः स्वरूपसंबंधा
त्मिकायाःप्रतिव्यक्तिभिन्नत्वेनधूमत्वादेरपिनतदनतिरिक्तवृत्तित्वात्त। नचतत्त्यादिधयत्किंचिदेकाभावप्रतियोगितास
मानासन्नस्यावृत्तित्वंतत्त। अतएवातिरिक्तसामान्याभावस्याभावेधूमत्वादेस्यनवच्छेदकत्वापातादघेतत्साधनमपिसं
गच्छतइतिवाच्यम्। वह्निघटद्वत्तित्वेहित्वतार्णातार्णदहनवृत्तित्वहित्वाघवच्छिन्नप्रतियोगिताकाभावप्रतियोगितान
तिरिक्तवृत्तित्ववह्नित्वादावतिप्रसंगात॰ एतेनान्यूनवृत्तित्वविशेषितमपितत्परास्तम्। अतएवनानाप्रतियोगिवृत्ते
कप्रतियोगितांगीकारेपिननिस्तारः लघुरूपसमनियतगुरुरूपेणचसाध्यतायांसद्धेतावव्याप्तिः। तादृशतत्रवेक्षेष

शिरोम॰ २५

त्वाप्रसिद्धेरिति चेन्न। नाप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्य विवक्षितत्वात्। स्वसमानवृत्तिकं चावच्छेदकं यत्त्वम्।
तत्त्वं च स्वपर्याप्त्यधिकरणपर्याप्तवृत्तिकत्वम्। यावत्त्वादिकं न तत्पर्याप्तिमत्। अयमेको घटः इमौ द्वौ घटाविति प्रतीतिसा
क्षिकः स्वरूपसंबंधविशेष एव। त्रित्वादिकमपि न द्वित्वादिसमानवृत्तिकमिति द्वित्वादिना साध्यतायां नाव्याप्तिः। अप्र
टकं चावच्छेदकत्वं स्वरूपसंबंधविशेषः। एवं च प्रागुक्तयद्धर्मावच्छिन्नेत्यत्र यद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वा वाच्यौ
नोक्ताव्याप्तिनिरासः। वस्तुतस्तत्तदवच्छिन्नाभाववत्त्वं संबद्धस्वविशिष्टसामान्यकत्वस्वविशिष्टसंबंधिनिष्ठाभावप्रति
योगितानवच्छेदकत्वं तत्त्वं वा तदनतिरिक्तवृत्तित्वं च वाच्यम्। अत एव सत्तावान् द्रव्यत्वादित्यादौ जातिमन्निष्ठाभावप्रतियोगिता
वच्छेदकगुणकर्मान्यत्वविशिष्टसत्तात्वन्यूनवृत्तिकत्वेपि सत्तात्वस्य न क्षतिः। एवं स्वविशिष्टसंबंधिनिष्ठाभावप्रतियो
गितानवच्छेदकावच्छेदकत्वं बोध्यम्। तादृशप्रतियोगिताया विशिष्योपादेयाः नातो गुरोरवच्छेदकत्वविनादुर्वचत्व
म्। प्रतियोगित्वसंबंधित्वं च साध्यतावच्छेदकसंबंधेन बोध्यम्। अतो न संबंधभेदमादाय दोषः। कालिकविशेषणता राम॰ २५

विशेषेण साध्यतायां च तादृशप्रतियोगितावच्छेदकत्वमनित्यत्वे व्यक्तित्वे प्रसिद्धम्। अभावश्च प्रतियोगिव्यधिकरणो
बोध्यः। न च मौलमिदमीयं च प्रतियोगिवैयधिकरण्यमनुपादेयम्। संयोगत्वावच्छिन्नाभाववति संयोगत्वादिवि
शिष्टस्यवृत्तेर्गुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यकार्यसमवेतत्वा घटवच्छिन्नाभाववति वा वृत्तेरव्याप्तवि
शिष्टस्यवृत्तेर्व्याप्तेरनवकाशादिति वाच्यम्। साध्यमवान् हेतोरित्यादावतिव्याप्तेः। न तु त्रिकालावच्छेदेनापि महानसा
दौ किंचित्कालं योगे न वर्तते येन वह्निमत्योगोलकनिष्ठाभावप्रतियोगितावच्छेदकायोगोलकावृत्तिद्रव्यत्वावच्छि
न्नाभाववद्वृत्तित्वं धूमत्वविशिष्टस्य संभाव्येत प्रतियोगितयोरेकसंबंधावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्व
स्य वा विवक्षितो न रनुपादेयमेव प्रतियोगिवैयधिकरण्यहृदयम्। यत्राधिकरणे व्यभिचारस्तद्व्यत्तत्तत्प्रकारक
प्रमाविषयत्वत्तत्साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वादीनां साध्यतावच्छेदकविशिष्टसाध्यवन्निष्ठाभावप्रतियोगितावच
च्छेदकत्वात् न हेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाद्याव्याप्तिनिरासात्। तथा च विशेषण

शिरोम. २६ त्वाविशेषावच्छिन्नयद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वं तत्संबंधावच्छिन्नसाधनसामानाधिक
रण्यं तत्ताभावप्रतियोगितासामान्ये नास्ति साधने तद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरिति पर्यवसितोर्थः। प्रत्ययस
त्त्वं तु विशेषेणाधारतावच्छेदकं तत्प्रतियोगितावच्छेदकं तच्चैवेयं रीतिरुपादेयेत्यपि वदन्ति। गौरवप्रतिसंधानदशायाम
पि कंबुग्रीवादिमान्नास्तीतिप्रतीतिबलाद्गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः धनवत्त्वसाम्रतस्यातियोगिकाभावमात्रावल
नं तथापि विषयकिंचिद्विक्लिसत्त्वरवनाहृश्यप्रतीतेरनुदयात्। अत एवैकघटवति भूतले कंबुग्रीवादिमान्नास्तीति शब्दो
न प्रमाणम्। प्रमाणं घटसामान्याभावः। न चैवं लघुरूपसमनियतानां गुरुरूपाणामव्याप्यतापत्तिः गुरुणादिगुणकर्म
न्यत्वविशिष्टसत्त्वादिसमानाधिकरणत्वेनैवावच्छेदात्। तत्र तदनवच्छेदकधर्मीनां प्रातिस्विकरूपेणाभावानां कालसहस्रे
णापि ज्ञातुमशक्यत्वात्। एवं द्रव्यत्वत्वादिविशिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगोप्यनुसंधेयः। उपदर्शितप्रकारेणामपि स्व राम.
त्वादिघटितत्वेन दुर्ज्ञेयत्वाच्च। अत एव प्राणगयात्वगुणत्वादिना साध्यतायां द्रव्यत्वादेर्व्यभिचारित्वमपि साधु संगच्छते। तदास २६

पि केचिदिति। तन्मते पक्षविशेषेण। ननु पर्वमीलितावह्न्यभावाजलादेर्वह्नेर्नास्तीति विषयं ज्ञानयंति तत एव पर्वते कं धूमवति महान
सादौ वर्तते। न तच्च तेषां स्वस्वावच्छेदकतत्तद्वह्नित्वावच्छिन्नवैयधिकरण्यनिरूपिकायाः प्रतियोगितास्तदवच्छेदक
भेदवद्वह्नित्वमतो ऽव्याप्तिः। न चैवं वह्नित्वावच्छिन्नस्य तद्वह्नित्वावच्छेद्यत्वम्। तथा सति ह्रदादिवृत्तिधूमाभावप्रतियोगिताव
च्छेदकह्रदावृत्तित्वावच्छिन्नस्य वह्निमद्योगोलकवृत्तित्वादिभिव्याप्त्यापत्तेः। अथ यानुगतरूपं तत्तदभावप्रतियोगितानां
नावच्छेदकं अनवच्छेदकमेव तत्सर्वाभावप्रतियोगितायाः स्वभावान्तरे मानाभावात्। तथाच तद्रूपावच्छिन्नसाध्यकेव्यभि
चारितापत्तिरव्याप्तिरत आह। सामान्येति। संशयान्यथानुपपत्तिं प्रमाणयति अन्यथेति। वाय्वादिति। यद्यप्ययं संशयो न
वायुविशेष्यकस्तत्स्वविशेषणत्वेनोल्लेखात्तन्नरूपविशेष्यकः तथा सति रूपतदभावयोर्विरोधिनोरकोटितायोप्र
हतानुपयोगप्रसंगात्। तथापि वायुरूपवान्नरूपाभाववान्वेति रूपतद्रूपाभावकोटिसंशये तात्पर्यम्। अत्र स्पष्टरूपव
त्तद्भेदोऽन्याभावकोटिकः इति नाभेददृष्टिसंप्रदायविदः। विरुद्धैकधर्मिसंबंधावगाहिज्ञानमेव संशयो न तु तदुभयवद

शिरोम॰ २१ कारतापि नियता। तथा च तत्पदं तदभावविशेष्यको वा तद्विशेषणको वा स्यादिति न व्यभिचारः तद्वत्त्वतदभावकोटिको रूपधर्मिकत्व
वांशे संशयः अधिकरणे तत्तदभावान्यतरनिश्चयस्यापि तदधिकरणत्वसंशयविरोधित्वात्। अन्यथा भूतले घटतदभा
वान्यतरनिर्णयेपि घटो भूतलवृत्तिर्नवेति संशयप्रसंगात्॥ अपेक्ष्ये तावत्तिरूपणीयनिर्णयात्तथा च रूपाभावनि
र्णये संशयो न विरुध्यत इति चेत् न। घटवद्रूपाभावानिर्णायकत्वस्य यावन्तो रूपाभावास्तेषां यावत्त्वेन तेषां यावत्त्वे निरूप
णात्तावदभावानां यावत्त्वरूपत्वेन तदभावानां वा निर्णयत्वसंभवः। न प्रथममत्र तौ यौ। तथा निर्णीतत्वादेव नेतरो। प्रतियोगितद
भावयोर्यावत्त्वानिर्णयेपि योग्यानुपलब्ध्या भूतले घटो नास्तीति निश्चयमात्रादेव घटतदभावसंशयोच्छेददर्शनात् तत्र सा
प्यकिंचित्करत्वात्। नवातिरिक्तसंभावनाविरहसहकृततत्तदभावनिर्णयः तत्प्रतिबंधकः संभावना च तद्रूपपार्थिवादिनिरूप
मितत्वं तद्वेत्ताकारा निवर्तते चेयं रूपत्वावच्छेदेनैतत्सिद्धतयमितत्वाभावनिर्णयादेवेति वाच्यम्। गोरवाच्छिन्नाप्यतिरिक्तसंभा
वनां विशेषाभावनिश्चयेसामान्यसंशयदर्शनाच्च। अथ्याभावस्य सामान्यावच्छिन्नविशेषाभावाद्यवच्छिन्नप्रतियोगिताकत्वानि राम॰ २१

श्चयस्य तादृशसंशयविरोधी अन्यथा तथाप्यतिप्रसंगात्। स च न प्रकृते। अभावस्य स्वरूपावद्विशेषाभावाधिकरणस्यावृत्ति
त्वेन विशिष्टस्य तद्वच्छेदेनवासामान्यावच्छिन्नप्रतियोगिताकत्वम्। संभवति चेदं तादृशप्रतियोगितायाः अतिरिक्तता
त्वात्। ते नैकविशेषवत्तो विशेषान्तराभाववत्त्वेन सामान्याभावत्वप्रसंगः। नच प्रतियोगितावच्छेदकभेदस्याभावभेदनि
यामकत्वाद्भेदसिद्धिः प्रतियोगिभेदस्य नत्वेऽकघटप्रतियोगिकस्य प्रागभावादिचतुष्कस्याभेदप्रसंगादवच्छेदकं तु
भिन्नत एव तत्र क्वचित्प्रागत्यस्य क्वचित्संसर्गस्य क्वचित्पूर्वापरकालीनत्वहेतुत्वादेर्भेदतयात्वादिति वाच्यम्। संसर्गप्रति
योगिविशेषणतासाधारणस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वादेरन्यथात्वादिति वाच्यम्। संसर्गप्रतियोगिविशेषणतासाधार
णस्यैकस्यावच्छेदकत्वस्य दुर्वचत्वात्। पूर्वापरकालीनत्वस्य ध्वंसादिप्रतियोगितावच्छेदकत्वे प्रमाणाभावाच्च। किं चावच्छेदक
भेदस्याभावभेदनियामकत्वे नञनेकत्वमसंभावादिस्वरूपस्यानन्त्यात्। नापि तद्व्याप्यत्वं वैयधिकरण्यापातात्। अतएव
व नतद्व्यापकत्वमपि। भेदेप्य विरोधाच्च। नच तदितरधर्मावच्छिन्नप्रतियोगिताकत्वं तदवच्छिन्नप्रतियोगिताकान्यत्वस्य वा

शिरोम.
२८

ध्यत्। मानाभावात्। अत एव समनियतसुखदुःखादिकं संख्यापरिमाणाद्यकाशादिनानाधर्मावच्छिन्नोप्यमिलित एवाभावः
भेदसिद्धिस्तु भाववदभावस्यापि विशिष्टधर्माध्यासादेव। अत एव च गगनादीनामवृत्तीनां समनियतानां धर्माणामेकर
वात्वं नाभावः युगपद्विनष्टानामुत्पन्नानां वा समानदेशानामसति बाधके एक एव ध्वंसः प्रागभावो वेति व्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकोपि चेदभावः प्रामाणिकस्तदैकस्यैव प्रतियोगितासंबंधैरेव व्यधिकरणैर्धर्मैः सर्वैरेव
वा समानाधिकरणैः संबंधैरवच्छिन्नतामाकाशाभाव एव वा नयात्वमिति। मैवम्। एवं हि तत्तद्देशकालाद्यवच्छि
न्नानवच्छिन्नतत्तदधिकरणवृत्तित्वेन विशिष्टस्य तत्तदवच्छेदेन वा एकस्यैवाभावस्य घटपटगोत्वाश्वत्वादिप्रतियोगि
कत्वसंभवेन तद्भेदोपि लुप्येत। तत्तत्प्रतियोगिकत्वं तत्तदभावो न तत्राधिकरणविशेषवृत्तित्वसंसर्गाभावो। वच्छेदक
त्वं वेति समानम्। अत एव सामान्यावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तीत्यपि प्रत्युक्तम्। अव्यासज्यवृत्तेस्तत्त्वभा
वस्य तत्त्वानुपपत्तेः अतिरिक्तकल्पने च किं मया पराद्धमतिरिक्ताभावेन किं च व्यधिकरणयोर्घटपटयोर्द्वित्वप्रतीतिवद्यधि राम. २८

करणानामपि विशेषाभावानां युगपदिन्द्रियसन्निकर्षे सामान्यावच्छिन्नप्रतियोगिताकत्वप्रत्ययोपि स्यात्। अपि च तत्तत्सं
नरेण संबंधविषयावाव्यासज्यवृत्तिधर्मस्य ज्ञानेन यावदाश्रयसन्निकर्षापेक्षा मानाभावात्। एवं च एकाभावसन्निकर्षे
पि सामान्याभावबुद्धिप्रसंगः। यादृशे च तस्य ज्ञाने यावदाश्रयाणां सन्निकर्षापेक्षितेन च तेषां तद्भेदस्य ज्ञानमपि तदज्ञा
ने तद्भेदज्ञाने च तदग्रहात्। आश्रयभेदस्य मेरोरानन्तदर्शनात्। न चावश्यावद्विशेषाभावानां प्रथममनुपस्थितिः संभव
ति तत्प्रतियोगितानां विशेषतः प्रथममनुपस्थितेरिति दिक्। केचित्त्वनंतविशेषाभावानां सामान्यावच्छिन्नप्रतियोगि
ताकत्वस्य तथा व्यासज्यवृत्तित्वस्य च कल्पनामपेक्ष्य लाघवात् सामान्यावच्छिन्नप्रतियोगिताकत्वेनैक एवाभावः कल्प्यते।
कल्पनीयशरीरस्योभयत्वेप्येतद्रूपे सत्तस्य गुरुत्वात्। विनिगमनाभावेपि च सामान्याभावसिद्धिरप्रत्यूहैव। धर्मिकल्प
नातो धर्मिकल्पनाया गुरुत्वं कल्पनीयानेकत्वप्रयुक्तं। न चातिरिक्ताभावस्य तत्तच्च सामान्यावच्छिन्नप्रतियोगिताकत्व
स्यापि अनंतवाद्याद्यधिकरणवृत्तित्वस्य च कल्पनामपेक्ष्य सानंतवाद्याद्यधिकरणवृत्तीनां यावद्विशेषाभावा

शिरोम. २९ नामेव सामान्यावच्छिन्नप्रतियोगिताकत्वस्य तथात्वस्य च कल्पमेव लघीयसीति वाच्यम्। एवं सत्यभावमात्र
सिद्धिप्रसंगादित्याहुः। यद्वेत्यादि। अन्यथा तत्तन्नानाव्यक्तिरूपादिसाध्यकैकव्यक्तिपृथिवीत्वादावव्याप्तिः। न च तत्तद्रूप
वत्त्वादिकमेव साध्यं तच्च परंपरासंबंधेन रूपवत्त्वादिकमेव तेन संबंधेन तदभावश्च न पृथिव्यादाविति वाच्यम्। रूपा
देः साध्यतापत्तिः द्रव्यत्वादिविशिष्टसत्त्वाद्यभावस्य द्रव्यादिवृत्तित्वात्। सत्त्वादिसाध्यकद्रव्यत्वादौ अव्याप्तेश्च।
अन्यथा विशिष्टसत्तादेः साध्यत्वे व्यभिचारिणि ज्ञातिमत्त्वादावतिप्रसंगात्। व्युत्पादयिष्यते च विशिष्टाभावस्य वि
शेष्यप्रतियोगिकत्वम्। द्रव्यत्वाद्यवच्छिन्नसाध्याभावस्य तत्र सत्त्वाच्च। अन्यथेत्यादि प्रतियोगित्वं प्रतियोगिताभावः स च
येन रूपेण तद्रूपावच्छिन्नव्याप्यत्वं हेतोरस्ति चायं रूपादेः रूपत्वादिना न पृथिव्यादिनिष्ठाभावप्रतियोगित्वमिति
प्रत्यपादीति चेन्न। तादृशप्रतीत्या हि रूपत्वादेः प्रतियोगिताया अवच्छेदकत्वाभावो रूपत्वेन तु न तदभावावच्छेदकत्वे राम.
तम्। सर्वत्रैव रूपे पृथिवीनिष्ठाभावप्रतियोगित्वं न कुत्रापि रूपे तदभावे त्वबाधितप्रत्ययात्। अन्यथा यो यो धर्मो यस्य यस्य २९

नावच्छेदकत्वात् तदवच्छेदेन तदभावोऽप्युक्तरीत्या सिध्येत्। प्रमेयधूमत्वेन वह्निमन्निष्ठाभावप्रतियोगित्वमिति प्रत्ययात्। न त्व
च्छेदेन तादृशप्रतियोगित्वाभावस्यापि सत्त्वाच्च। अयं प्रमेयधूमत्वं न गोत्वे सामानाधिकरण्यप्रतियोगितावच्छेदकं।
विवक्षितं चात्र नयेति चेत्। असमानाधिकरणाश्च एककव्यक्तिवृत्तितया वह्नित्वमपि न तदवच्छेदकं कंबुग्रीवादिमत्त्वादिना
घटादेः साध्यतापत्तिरिति वक्ष्याकोपश्च। अत एव प्रमेयधूमत्वं गोत्वे वा प्रतियोगितापादकतत्त्वन्यूनतया अपि नावच्छेदक
इत्युक्तावपि न निस्तारः। अत्र वदन्ति। अप्रतियोगित्वं प्रतियोगितानवच्छेदकधर्मवत्त्वम्। न चैवं रूपसामान्ये दृष्टं तत्र साध्य
ज्ञातीयसमानाधिकरणसाधनजातीयत्वस्य अत्र साध्यसाधनयोः सामानाधिकरण्यस्य व्याप्तित्वे तात्पर्यात्। घटक
योस्तादृशप्रतियोगितावच्छेदकतान्योन्याभावयोर्भेदेन भेदरूपसामानाधिकरण्यस्य व्याप्तित्वेन तात्पर्यात्। घटघटित्वा
त्वेनाभावगर्भं वस्तुसामान्यविशेषभेदेनान्योन्याभावगर्भमपि व्याप्तिलक्षणद्वयमाह। यत्समानाधिकरणेत्यादि लक्ष
णद्वये न प्रत्येकस्य साध्याधिकरणात्यन्ताभावाप्रतियोगित्वमिति पलहरणं। अत्र यद्यपि नानाव्यक्तिसाध्यकस्य तेन तत्साध्यव

तत्तत्साध्यवत्त्वस्य च साधनसामानाधिकरण्यान्योन्याभावप्रतियोगितावच्छेदकत्वाद्व्याप्तिः। तथापि यद्रूपावच्छिन्नवत्त्वं ता
दृशान्योन्याभावप्रतियोगितानवच्छेदकं तद्रूपावच्छिन्नसामानाधिकरण्यमित्यत्र तात्पर्यमावश्यकं। तत्रैतद्योगादौ तादृश
हेतौ वा साध्ये सर्वत्र सत्तादिसाम्यं परंपरया वा तु गमकं वह्नित्वादिकमेव साध्यतावच्छेदकं तदवच्छिन्नवत्त्वस्य च न तादृशान्योन्याभा
वप्रतियोगितावच्छेदकत्वमिति। यत्तु यद्रूपावच्छिन्नं यादृशरूपावच्छिन्नमनवच्छेदकं इति वाच्यं प्रायः यद क्रमस्य मा। श
वैकस्यानुपादेयत्वात्। अन्येत्यादि। यद्यपि तु कश्चित् सर्वत्र तादृशप्रतियोगितानवच्छेदकत्वपर्यंतानुधावनस्या
वश्यकत्वेन किंचित्करमेव तादृशाभावप्रतियोगित्वं तथापि विशिष्टसामानाधिकरण्यरूपायाः व्याप्तेर्व्यधिकरणा
संभवित्वमादिना। तात्पर्यं। व्याप्तिरेवेति। तस्य कालिकाद्यादिष्व न्योन्याभावगर्भलक्षणस्याप्यव्याप्यवृत्तिसाध्यकसद्धेता
वव्याप्तिं निरस्यति अन्यथेत्यादि। अभेदस्येति। तथा च मूले महारूढो विहंगमसंयोगीनेति प्रतीतेरनुभवमानत्वविशिष्टभेदाद्
रिव न्यायविशिष्टावित्यष्टइति प्रतीतिवद्विशेषणाभावविषयतामात्रं कल्प्यते - - - - - -

[redacted] वाधवत्त्वात्तायवद्विशिष्टभेदेन बाधकं तत्र तथाप्रतीतिवत्तात्र
तिद्विरप्रसद्वैवेति प्रसंगः। अत्र वदंति। अभेदस्य भेदाभावस्य ज्ञानं न बाधकं भेदवत्त्वप्रतियोगितावच्छेदकस्य संयोगा
त्मनः तदभावस्याव्याप्यवृत्तित्वेन तदुपपत्तेः। यथाहि प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिज्ञाने तदत्यंताभावस्याग्र
हात्। अभावव्यवहारश्च सएव तदभावइति कल्प्यते तथा प्रतियोगितावच्छेदकधर्मग्रहे तद्वदन्योन्याभावस्याग्रहाद
भावव्यवहारश्च स एव तस्याभावइति निष्पीयते। आधिक्येप्यव्याप्यवृत्तित्वात्। अत एव मूलावच्छेदेन कपिसंयोगिभे
दाभावज्ञाने तयोः संभवादसिद्धेश्च। नापि संयोगिभेदस्य वृक्षावृत्तित्वज्ञानं असिद्धेः तद्भिन्नस्यैवग्रहात्। नापि क
पिसंयोगिभिन्नभेदज्ञानं कपिसंयोगिभेदवत्त्वदर्शनस्याव्याप्यवृत्तित्वेऽविरोधात्। नापि मूलावच्छेदेन तज्ज्ञानं असि
द्धेः तद्धर्मावच्छिन्नभेदस्य तद्धर्मावत्पर्यवसितत्वात् तथा कपिसंयोगिभिन्नभेदात्मनः कपिसंयोगस्य मूलवृत्तित्वे बाधात् न हि
घटभिन्नभेदो घटत्वादतिरिच्यते। अवश्यं क्लृप्तघटत्वेनैवोपपत्तौ अतिरिक्तकल्पनायां मानाभावात्। अन्यथा सर्वत्राभे

शि·रो·म·
३१

वस्याभावोऽस्तीति रिक्तएवक [redacted] स्येति· अनन्यत्वं तदभावप्रतियोगिनोः अन्योन्याभा
वप्रतियोगितावच्छेदकयोः सामान्यत एव कश्चाविरोधः न च कपिसंयोगवत्यपि वृक्षे मूलेन कपिसंयोगस्य प्रतीतेरन्य
थानुपपत्त्या तावदाघयोः ससंकोच्यं तान्त्वेषा प्रतीतिः कपिसंयोगिभेदविषयत्वेनोपपादयितुं शक्यानियमतः संयो
गवत्वेन प्रतियोगिनोनुपस्थितेः प्रतियोगिकोटौ तदनुल्लेखाच्च। मूले न कपिसंयोगीति प्रतीतेस्तु शिखी विनष्ट इति व
द्रासमानविशेषणस्याभावमात्रविषयत्वेनोपपन्नत्वात्तोभिमयोरपि सदृश इति परास्तम्। अन्योन्याभावोत्तरस्य प्रतियोगिता
वच्छेदकान्तरसमानाधिकरणतया स्वस्वप्रतियोगितावच्छेदकासामानाधिकरण्यपर्यवसायिनो विरोधस्य स्वलघटि
ततयाविशेषएव विश्रामात्। अत्यन्ताभावप्रतियोगिनोरिवान्योन्याभावप्रतियोगितावच्छेदकयोरव्याधिकसामाना
धिकरण्यानुभवेन प्रतिरुद्धत्वात्तथाविधविरोधकल्पनायाः अनवकाशाच्च किंचसि· शिखी विनष्ट इति प्रतीते
र्विशिष्टध्वंसोल्लेखित्वाविशेषेण दाधारस्त्री विशेषणाध्वंसविशेषविषयतानतसंयोगीतिप्रतीतेर्विशिष्टभेदमवगाहमा

रा·म·
२१

नापाः कथं विशेषणसंसर्गाभावविषयत्वेनोपपत्तिः न खलु सहस्रेणापि बाधके रिदं रजतमिति प्रतीतेरंगत्वावलेवनतं
व्यवस्थापयितुं शक्यते· न च विशेषणाभेद एव तस्या विषयः अग्रेपि न संयोगीति प्रत्ययापत्तेः दृश्यते चान्योन्याभावोप्य
स्या वृत्तिः। कथमन्यथा पक्वतादृशायां घटादावपं नश्यमोदंडादिविरहसमये चैत्रादेर्नायं दंडवानित्यादयो
व्यवहाराः न च तत्र विशेषणसंसर्गाभाव एव प्रतीयते। अनुयोगिनि सप्तमी विना तदनुपपत्तेः न खलु भू
तलं घटो नेत्यादिना कानि कदाचिदपि संसर्गाभावबोधयति· तथात्वे ना घटेन घट इत्यादेरपि प्रसंगात्। अपि च
विशिष्टपाचकं इत्यादिपदैर्बोधस्तु पसर्जनतयोपस्थितस्य दंडादेः कथं प्रतियोगित्वेनाभावेन्वयः। इतरविशेष
णत्वेनोपस्थितस्य निराकांक्षतया अन्यत्र विशेषणत्वेनान्वयायोगात्। न चात्र विशिष्टोपस्थापकं पदं विशेषण
मात्रपरं तथापि चैत्रो न दंडी घटो न श्याम रूपमित्यादेरपि दंडादिसंसर्गाभावप्रतीतेर्दुर्वारत्वात् सावारख्यानात्स्रा
लक्षणयावोपस्थितस्य कर्तुरेव भेदो भासत इत्युक्तम्। वस्तुतो नपचतीति चैत्रो नेदं मैत्रस्य स्यादौ विमतार्थस्य केतिसं

शिरोम. ३२ वेधादेरभावस्यावोधनेन ज्ञासत्वमीनापि स्पाते अप्येसते च व्याप्तिपदिकार्यस्येति चिन्तुरागनरस्तुपपादिष्यामः॥ नन्वेवं घ
र्मपरतयावश्यामइत्यादेः श्यामत्वादिविधर्मेत्यर्थः वैधर्म्यं च रक्तत्वादिकमेव॥ यदाहुराचार्याः श्यामादक्कोवि
धर्मानतुदृष्टयगित्यपिवदंति। इमित्थं जेप लक्षितेना संबन्धत्वेनेति। निरूपितत्वमेतत्। कस्येति। इत्यस्य चानतुगता
पात्र्यपिव्याप्तेर्यथाज्ञानमनुमितिहेतुस्तथावसेतेः एते अन्योन्याभावात्यन्ताभावरूपर्मे नादृशेति नन्वेकं द्वित्वा
दिकं प्रतियोगितावच्छेदकमेव न भवति किंवा भवदमेवपरं तु लक्षणानामेव तत्तद्धर्मावच्छिन्नप्रतियोगिताकानामभा
वानां लाघवादित्यभिप्रायः। नाद्यः। एकैकाभावप्रतीतेः द्वौ न स्त इति प्रतीतेर्विलक्षणत्वात्। शब्दादिना द्वौ न स्त इति निश्च
ये प्येकैकाभावसंशयात्। द्वितीयानुगमं विनानुगताकारप्रत्ययायोगात्। न चाभावस्य द्वित्वाधिकरणप्रतियोगिक
त्वमात्रं द्वित्वसमानाधिकरणधर्मावच्छिन्नप्रतियोगिकत्वं वा द्वयं नास्तीति प्रतीतेर्विषयः। तादृशद्वित्वाधिकरणव्य
क्तिविरहिणि तथाविधोभयशालिनि तादृशे द्वौ न स्त इत्यप्रयात्। द्वित्वसामानाधिकरण्याभावेपि प्रतीतेरनुगता राम. ३२

कारत्वाच्च। अत एव तादृशप्रतीतेर्घटत्वपटत्वान्यतरावच्छिन्नप्रतियोगिताकाभाव एव द्वौ न स्त इति प्रतीतेर्विषयः। द्वित्वाधि
करणयोरेव प्रतियोगित्वोल्लेखात्। द्वित्वादेर्घटादिवृत्तित्वानुपस्थितावपि अन्ततः शब्देनापि घटपटौ न स्त इति प्रत
या च। अत एवैकविशिष्टापराभावो न तद्द्वित्वकमिति रूपरसयोरपि जलत्वपृथिवीत्वयोर्द्वित्वेनाभावप्रत्ययादित्युक्त्वा च
।नोमस्तः। तथात्वेपि साध्यतेहेतौ तादृशाभावप्रतियोगित्वानपायात्। अन्तरंगत्वाभावेन एमेकेकघटवत्तिताय
मानाभावात् किंचिद्घटद्वयवृत्तित्वानुसंधानाभावे घटौ न स्त इति प्रतीतेरूपपादितुमशक्यत्वादिसतत्त्वाहा। अभ्युपग
मेवेति ० उभयत्वमेव प्रतियोगितावच्छेदकं ननु साध्यतावच्छेदकं साध्यवेत्यर्थः। अत्र अनुमाणावच्छेदकातोशेपि ल
क्षणे तथैव विवक्षितमिति भावः। तद्बोधितत्वं साधनत्वेनाभिमतः। तथा च साधनसमानाधिकरणात्यन्ताभावप्रति
योगितावच्छेदकत्वा यावद्भोधर्माय ध्रुमावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकास्तद्धर्मावलीढस
मानाधिकरणमित्यर्थः। एतेन सर्वत्र तादृशोर्यावद्धिरवच्छिन्नस्य तादृशावच्छिन्नस्याप्रवक्ष्यमितियोगिकस्य चातिप्रसङ्ग

शिरोम. ३२ कालेयावत्त्वावच्छिन्नप्रतियोगिताकातिरिक्तस्याभावस्याप्रसिद्धेः। तादृशावच्छिन्नप्रतियोगिताकानां यावदभावानां अधिक
रणास्यापि प्रायशस्त्वरूपादिसाध्यकपृथिवीत्वादावव्याप्तिश्च। क्वापि रूपादिव्यक्तौ तादृशयावदभावसामानाधि
करण्याभावादिति। ननु तन्मते सर्वत्र सोपाधावेकव्यक्तिकस्य संभवतोप्युपाधेर्धर्मान्तरविशिष्टत्वादिना ऽभावो भवत्येव
च्छिन्नप्रतियोगिताकायावेन्नाऽभावापद्मीवच्छिन्नसमानाधिकरणास्तद्धर्मावलीढसामानाधिकरण्यमित्यर्थः। अभा
वश्चात्र भावभिन्नो ग्राह्यः। तेन जलं स्नेहवत्त्वादित्यादौ स्नेहवत्त्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकरूप
सामान्याभावत्वावच्छिन्नप्रतियोगिताकाभावानां सकलरूपाणां जलत्वसामानाधिकरण्यविरहेपि नाव्याप्तिः। घट
ध्वंसो ध्वंसत्वादित्यादौ घटध्वंसत्वादेस्तत्प्रकारप्रमाविषयत्वादेर्भावाभाववृत्तेरतिरिक्तो ऽभावस्तादृशो न घटध्वं
सत्वादिसमानाधिकरण इति नातिव्याप्तिरित्यपि वदन्ति। यावदिति। स्वं व्यभिचारियेषां तेषां यावतां व्यभिचारिणा
साध्येन सामानाधिकरण्यमित्यर्थः। यावदिति। यत्तदोः साध्यत्वाभिमतपरं। सोपाधिवरणाय यावद्धितेलुप्तसप्तमीकस्य राम. ३३

द्वितीयात्यन्ताभावस्य विशेषणान्त यावत्साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वव्यापकसामानाधिकर
ण्यसामान्याभावकत्वमर्थः। केवलान्वयिस्थले चाकाशादिरेव तथाविधो ऽभावः प्रसिद्ध इति संप्रदायः। केचित्तु ताद
शयावदभावप्रत्येकत्वे यदधिकरणतायाव्यापकं तत्त्वमित्यर्थः।। न च तादृशप्रतियोगितानवच्छेदकत्वं तमेव यावत्त्वेन वि
शेष्यं यावत्तादृशाश्रयत्वे यदधिकरणतायाव्यापकं तत्त्वमित्यर्थलाभादेव सामंजस्ये ऽभावद्वयोपादाने न्यूनतिप्रयोजन
कमेवेति वाच्यम्। यावत्तां तादृशाभिधनादीनामेकाधिकरण्यस्याप्रसिद्धेः।। न चावच्छेदकांशमनुपादाय प्रतियोग्यपेव व्या
वत्त्वेन विशेष्यतां। साध्यव्यापकस्यापि रूपान्तरेण साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्योपदर्शितत्वादि
त्याद्युः। अवच्छिन्नं सामानाधिकरण्यं सामानाधिकरण्यावच्छेदकरूपवत्त्वे वाव्याप्तिः। इत्यंशे भ्रम तद्व्यक्तित्वादेर्व्या
प्यतावच्छेदकत्वं दण्डत्वादेर्नियतपूर्ववर्त्तितावच्छेदकधर्मस्य कारणतावच्छेदकवदभेदेपि उपहितातु उप
हितभेदाद्धास मर्थनीयं तत्राव्यमभिप्रस्याह। यत्तद्बंधित्वेति। सासंबंधिता सामानाधिकरण्यरूपा ज्ञेनेको नादि

शिरोम. ३४

व्यावृत्ता• अत्र च विशिष्टसत्तात्वावच्छिन्नगुणादिसामानाधिकरण्याधिकरणसत्तादेः कर्मादौ परामर्शाद्गुणाद्यनु
मित्यापत्तिः साध्यसामानाधिकरण्यविशिष्टहेतुमत्तापरामर्शरूपहेतुसाध्यनिर्णयात्प्रागसंभवी तत्तु नश्येनाद्विता
यम्। अथ मालोको धूमो वेत्यादौ विशिष्य तद्धेतोः सामान्यतोवच्छेदकरूपवत्त्वनिर्णयः संभवतीत्येवतद्द्वयम्। अवा
वच्छेदकत्वेनान्यूनवृत्तित्वम्। अन्यूनातिरिक्तवृत्तित्वं वा वह्न्यादौ साध्ये मेयत्वादावतिप्रसंगात् धूमत्वादावप्रसंगाच्च
। किं त्वनतिरिक्तवृत्तित्वं• तच्च यद्यपि नतद्भाववद्वृत्तित्वं गुणवत्सत्त्वादिस्वरूपसत्तात्वेतिप्रसंगात् न च कर्मादिवृत्तित्वा
वच्छेदेन गुणसामानाधिकरण्याभाववत्त्वां सत्तायां वर्त्तमानत्वात्तयात्वम्। तथा सति विशिष्टसत्तात्वेप्यनुपदर्शित
दिशा च धूमत्वादावव्याप्तिप्रसंगात्। तथाप्यतिरिक्ते यद्धर्मविशिष्टहेत्वधिकरणवृत्तित्वं न वर्त्तते तत्त्वं साध्यासमानाधि
करणवृत्तित्वव्याप्ति स्वविशिष्टाधिकरणवृत्तित्वसामान्यकत्व स्वविशिष्टाधिकरणवृत्तित्वावच्छिन्नसाध्यासमानाधिकरणक
त्वं चेति फलितार्थः सत्तात्वविशिष्टसत्ताधिकरणकर्मादिवृत्तित्वस्य साध्यासमानाधिकरणकर्मत्वादौ सत्त्वान्नातिप्रसंगः। रा.म. ३४

कर्माद्यन्यत्वविशिष्टसत्ताश्रयो न कर्मादिरिति नातिप्रसंगः। एवं च मेयत्वादेरपि केवलान्वयिसामानाधिकरण्यावच्छेदकत्वो
पपत्तिः। यत्तु वृत्तिमत्त्वादिकमेव तत्र व्याप्तिः तद्वद्धत्त्वमेयत्वादिनेति• तन्न। व्याप्तिविरहिवृत्तितया गृह्यमाणेन रूपेणाव्या
प्तिग्रहासंभवाद्व्याप्त्यतिप्रसंगात्। साध्यतावच्छेदकसंबंधेन साध्याधिकरणे येन येन संबंधेनावर्त्तमानत्वं हेतुतावच्छेदकसंबं
धेन हेत्वधिकरणेपि तेन तेनैव तत्तयात्वं बोध्यम्। नीलधूमत्वादेर्वारणीयत्वे तु स्वसमानाधिकरणतादृशधर्मान्तराघटितत्वे
न विशेषणीयं सामानाधिकरण्यापादानात् धूमप्रागभावत्वादिसंग्रहः। तद्घटितत्वं च तद्विषयकप्रतीतिविषयत्वं स्व
रूपसंबंधविशेष एव नावच्छेदकत्वम्। अत एव नत्वतिप्रसक्तमवच्छेदकमित्यादिकमपि संगच्छते। अन्यथातिप्रसक्तेः
नति प्रसक्तत्वस्याप्रसक्तत्वेनत्वविराकरणायोगात्। विरुद्धयोर्भावाभावयोरधिकरणे एकस्यैकेन संबंधेन वृत्तिर्विरुध्य
ते अतः तत्त्वावच्छेदकभेदापेक्षा। अत एव व्यभिचारिणि साध्यतद्भाववत्सामानाधिकरण्ययोर्विरुद्धयो रूपपादनायउपाधि
तद्भावावच्छेदकाव नु मन्यते न्यायाचार्याः। सत्तात्वे तु गुणाभावस्यैव गुणस्यापि न सामानाधिकरण्यावच्छेदकं विरोधात्।

शिरोम·
३५

अव्याप्यवृत्तेरप्यकपिसंयोगादेरधिकरणे वृक्षादेरन्द्भावस्य संयोगेन वा वृक्षादेरधिकरणे महानसादेः समवायावच्छिन्नप्र
तियोगिताकतदभावस्य सत्त्वेनाविरुद्धत्वात्· वह्निमति संयोगेन वह्निमानस्य धूमादेर्वह्न्यभाववत्तित्वात् अवयवे संयोगेनावह्नि
मानत्वाद्वा तद्रूपत्वत्व धूमत्वादेर्न साध्यसामानाधिकरण्यावच्छेदेन साध्याधिकरणवृत्तित्वग्रहायोगात्। अस्तु वा एत
न्मते हेतुवृत्तिधर्मस्य साध्यसामानाधिकरण्यानवच्छेदकत्वमेव व्यभिचारः न हीदेव साध्याद्विरोधिनो व्यभिचारेऽनुरध्वी स्त
परं पचेति। नीलधूमत्वादिकं तु गौरवान्नावच्छेदकम्। एवं च लघु धूमत्वादिकमेव सामानाधिकरण्यावच्छेदकं व्याप्तिः न तु
तत्सहचरितकं तु र्यावादिमत्त्वादिकं तेन च गुरुणापि रूपेणाव्याप्तिग्रहे कथायो हेतोरुपन्यासे वाऽनुयोगः प्रकारान्तरेण
व्याप्तिवादिनामपि समानः। एवं द्रव्यं रूपादिमत्त्वादित्यादौ सकलगुणसाधारणस्य गुणत्वस्य द्रव्यादिसाधारणस्य गुणास
मवेतत्त्वे सति द्रव्यसमवेतत्वस्य चैकस्यावच्छेदकत्वसंभवे वृक्षानां रूपत्वादीनामपि न तत्त्वे विरुद्धधर्मद्वयाधिकरणयोरैक्यक
स्येकेन संबंधेन वृत्तेर्नोकथं विरोधः। कथं वा द्रव्यत्वादौ साध्ये हेतुत्वेन विशिष्यरूपादेरयोगः। तथा परामर्शाद्यनुमितिरिति शि·म·
२५

तु विभावनीयम्। अपरे तु यद्धर्मविशिष्टहेत्वधिकरणत्वं साध्याधिकरणतायाऽवच्छेदकं स धर्मो व्याप्तिः। ग्रंथस्तु धूमस्य
धूमवतः धूमत्वं धूमवत्त्वं वह्नेस्तु वह्निमत इत्यादिप्रकारेण व्याख्येयः। अत्र चावच्छेदकत्वं न स्वरूपसंबंधविशेषः। विरु
द्धदिक्कालावच्छिन्नवृत्तिकस्यान्यतरदेशकालावृत्तिकादेरप्याधिकरणतायां अवच्छेदकं स धर्मो व्याप्तिः। ग्रंथस्तु धूमस्य
धूमवतः धूमत्वं धूमवत्त्वं वह्नेस्तु वह्निमत इत्यादिप्रकारेण व्याख्येयः। अत्र चावच्छेदकत्वं न स्वरूपसंबंधविशेषः
विरुद्धदिक्तदसंभवात् तुल्यवृत्तिकधर्मद्वयाधिकरणतयोर्मिथोऽवच्छेद्यावच्छेदकभावस्य विनिगन्तुमशक्यत्वात्। न्यू
प्यन्यूनवृत्तित्वं न्यूनवृत्तिकधूमादेरव्याप्यतापत्तेः। किं त्वनतिरिक्तवृत्तित्वं सामान्येन वृत्तितत्त्वमिति यावत्। अत एव नैके
वलान्वयिन्यव्याप्तिः। अत्र च यदन्यूनवृत्तिसाध्यं तत्त्वं स्वव्यापकसाध्यसंबंधित्वपर्यवसन्नमपेक्षागौरवं परमवशिष्य
ते तच्चाग्रे ग्रंथकार एव विवेचयिष्यतीत्याहुः। उपाधिनेति· विशेषणतामापन्नेन· उपाध्यनुप्रविष्टेनेति यावत्। वह्न्यावा
ईंधनप्रभववह्नित्वेन रासभादींधनादौ च तथाविधवह्निविशिष्टत्वेन धूमसंबंधेऽवच्छेदमानेन तथाविधवह्नेरु

शिरोम· १६ प्रवेशात्‌· रासमत्वादिकं तु निविशते न वेत्यन्यदेतत्। अत्र चेदं स्नेहवत्त्वनिःस्नेहत्वास्पर्शादित्वं च विनाप्युपाधिप्रवेशनं
शीतत्वेन शीतान्यत्वेन वा साध्यासमानाधिकरणतया साधनव्यापकतया वास्त्वयमनुपाधिना केवलेन विशेषणीय
वा शीतान्यस्पर्शत्वेन चोपाधिनास्तु तत एव स्पर्शे साध्यसंबंधोऽवच्छिद्यत इति उपाधिनैवेति नियमेन तात्पर्यं परं तु स्व
ह्यस्य साधनतावच्छेदकस्यानवच्छेदकतामात्रे· यत एव सोपाधौ साधनतावच्छेदकातिरिक्तं नियतमवच्छेदकमस्ते
एवं तर्हि शेषवत्त्वोपाधिरिति वदंतीत्याह। अन्यथेति। अन्यावच्छेदकत्वसामानाधिकरण्येन· तत्त्वं चान्यानवच्छिन्नत्वं व्यापक
त्वमितियावत्। तदधिकरणं तदभावेन तेन साध्यविशिष्टसाधनतावच्छेदकावच्छिन्नसाधनवत्त्वव्यापकाधिकरण
ताकत्वं पर्यवस्यतीति निरुक्तविशिष्टसाधनव्यापकत्वमिति तु निष्कर्षः। इत्थं च सत्ताद्येकव्यक्तिकहेतुनिष्ठद्रव्यत्वादिसा
मानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगितिघटत्वादेर्नातिप्रसंगः। न वा द्रव्यं जन्यत्वे सति सत्त्वादित्यादौ द्र राम· ३६
व्यत्वविशिष्टसत्ताद्यव्यापके स्पर्शवत्त्वादावप्रसंगः। निःस्नेहस्पर्शात· द्रव्यं सत्त्वादित्यादौ शीतस्पर्शान्यत्वरूपान्यतादि

वारणाय तत्वेत्यादि· तत्र साध्यविशिष्टसाधने· विशेषणं· साध्याभावविशिष्टसाधनात्तत्सामानाधिकरण्येन व्या
वर्तकं साध्याभावविशिष्टनिरुक्तसाधनवद्वृत्तीतियावत्। एवं च द्रव्यं सत्त्वादित्यत्र सत्तायाः अभेदेपि गुणकर्मान्य
त्वेनाव्याप्तिः। नापि द्रव्यं कर्मान्यत्वे सति सत्त्वादित्यत्र गुणान्यत्वादौ। इत्थं च साधनतावच्छेदकस्यानवच्छेदकत्वयोग्यता
यपरं तद्विवेचनोक्तिः। न तु विवक्षितं तत्रैवैयर्थ्यात्। इदं दधिजन्यं वा दध्र इत्यादौ दधित्वाद्यव्याप्तेश्च। यद्वा· प्रकृतसाध
नतावच्छेदकानवच्छेद्यप्रकृतसाधननिष्ठसाध्यसंबंधितावच्छेदकत्वं प्रवेदलार्थः। अनवच्छेदकत्वं च तस्य साध्याभावविशि
ष्टसाधनवृत्तितया तद्विशिष्टसाधनस्य साध्याभाववद्वृत्तित्वेन साध्याभाववत्त्वविशिष्टसाधनवत्त्वेनेतियावत्। एते
नधूमवान् वह्नेरित्यादौ मेयानवच्छेद्यसाध्यसंबंधाप्रसिद्धिः। गुणवत्त्वगुणकर्मान्यत्वे सति जातिमत्त्वादित्यादौ जा
तित्वघटकविशेषत्वादेर्वैयर्थ्येन विशिष्टस्यानवच्छेदकतया गुणकर्मान्यत्वादेरुपाधिताप्रतिक्षेपेति निरस्तम्। अवच्छे
दकत्वमर्थः पर्यवस्यति। उपदर्शितशीतस्पर्शान्यत्वादिवारणाय· तत्वेत्यादि· तत्र साधनतावच्छेदकावच्छिन्नसाधन

शिरोम. स्वव्यापकत्वमर्थः पर्य्यवस्यति। उपदर्शितरीतस्पर्शान्यत्वादिवारणाय। नत्वेत्यादि। तत्रेत्यादि। तत्र साधनतावच्छेदक
१७ विशिष्टे साधने विशेषणं साध्यसूत्रादाय हेतोरौपाधिकस्य सामानाधिकरण्यविशिष्टप्रकृतसाधनवत्त्वं साध्याभावव
त्तिनवत्तेन इति यावत्। तथा च साध्याभावविशिष्टप्रकृतसाधनाधिकरणसामान्यात्साध्यविशिष्टप्रकृतसाधनाधि
करणसामान्यस्य व्यावर्त्तकमिति तु समुदायार्थनिष्कर्षः। केचित्तु विशेषणे समानाधिकरणं तथा च सामानाधिकर
ण्यप्रत्यासत्त्या येनावच्छिद्यते अवच्छेदकीभूतसामानाधिकरण्यप्रतियोगीति यावत्। अवच्छेदकत्वं चेह अन्यूनानतिरिक्त
वृत्तित्वं गुरोरप्युपाधिसामानाधिकरणकीभूतसामानाधिकरण्यप्रतियोगीति यावत्। अवच्छेदकत्वं चेह अन्यूनानति
रिक्तवृत्तित्वं गुरोरप्युपाधिसामानाधिकरण्यस्याहृतमेव। यद्यपि प्रत्यक्षः उद्भूतरूपात्तमहानेकद्रव्यत्वादिसत्त्व
महत्त्वस्यानित्यसमवेतत्वस्य च वक्ष्यमाणलक्षणाक्रान्तस्योपाधेः सामानाधिकरण्यं साध्यसामानाधिकरण्यन्यूनाति
रिक्तवृत्तिः तथापि हेतुनिष्ठसाध्यसामानाधिकरण्यस्य हेतुनिष्ठत्वसाध्यसामानाधिकरण्यमन्यूनानतिरिक्तवृत्तित्वं वि राम. १७

षणत्ते तत्र भासमानार्थः। न विवक्षितः। तत्र विशेषणत्वं स्यादिति चक्षुर्वा हि वा. संबद्धपदस्यैव वा परंपरासंबंधेन स
त्वं वद्विशेष्यकज्ञानप्रकारोऽर्थः। तथा च सैव विशेषणत्वेनार्थः। अत्र च वह्निरिन्द्रियस्य लौकिकसंबंधो
ज्ञानस्य तद्विन्द्रियजन्यत्वं च नियामकम्। एवं वारणत्वेन यत्किंचिद्गुणस्य स्थितावपि सकलगुणसगोच
रो मानसो बोध इति चेद्भ्रान्तिः। एतेन धूलीपटले धूममन्यमेतत्र वह्निव्याप्तिग्रहे तत्रासता धूमत्वेन धूमेप्युपस्थित
धूमदर्शनाद्वह्न्यनुमितिर्न स्यात्। हेत्वभावेन परामर्शानुत्पादात्। किं च धर्मिणि गोत्वे च शात्रपनेनाप्रत्यक्षमासोन
समरणप्रकारोऽभवती सामान्येन गृह्यमाणो न वा लौकिकसन्निकर्षविनैव पिचाक्षुषज्ञानापत्तिरिति परास्तम्।
सामान्यं च संख्यादौ खं २३ भेदेन द्विधा। संख्येये चाखंडमेव परंपरासंबंधं प्रत्यासत्तिः येन संबंधेनेन्द्रियसंबद्धं सा
मान्यं ज्ञायते तेन संबंधेनाधिकरणानां प्रत्यासत्तिरिति। न तु यत्र नानाधिकरणप्रत्यासत्त्वे एकव्यक्तिघटादिस्त
त्राभावाभावादिर्वा अनित्यः प्रत्यासत्तिस्तत्र तदभावदर्शनात्तथात्वप्रत्यासत्त्याज्ञानानुस्यप्रसंग इति चेत्। तथापि

शिरोम ४८ तद्धाराप्रत्यासत्तस्य च त्वादेरेव प्रत्यासत्तित्वात्. एतदस्वरसेनैव वाह्नितीयंप कृ मा हा अतिरिक्तैवेवेति। अति
रिक्ता॥ इंद्रियसंबंद्धेतादृशसामान्यज्ञानात्मिका। अतीतादयनुरोधात्सामान्यज्ञानं प्रत्यासत्तिः। अपेकृणी
यं तदिंद्रियकरणतद्धर्मवत्त्वबोधसामग्र्यंतरम्। अत एवाधतमसे सोहमिति नीसंपातजनितेपि द्रव्यप्रत्यक्षे च
रमं न चाक्षुषो निखिलद्रव्यसाक्षात्कारसंतान इति तु न व्याप्य यं च धर्मविषयकं ज्ञानं धर्मिणः प्रत्यासत्तिरित
रा तु यद्विषयकं ज्ञानं तस्य। अत एव सुरभिचंदनमित्यादौ सौरभत्वादेरपि भानमिति॥ ततः स्वतासे त्रिंग। अ
न्तसमानाधिकरणत्वं तत्ताभावाप्रतियोगिवह्निसमानाधिकरणवृत्तिधूमत्वम्. वह्निमदन्यावृत्तित्वं. वह्नि
संबंधितावच्छेदकरूपत्वं वा व्याप्तिः। एकैव चसा सर्वधूमसामानाधिकरणीति भावः। व्याप्तिता तात्वेतु पूर्व
तीमवह्नेरसन्निकर्षे तत्सामानाधिकरण्यग्रहायोगात्स्वदीयवह्निसामानाधिकरण्यस्य च भानं गीत्कारस्म
मत्वापत्तिरिति द्रष्टव्यम्। गवादिपदेष्वपीति. शक्यानुभवं स्मरणे हेतुः. हेतुमात्वात्कार्यबोधः। नचैवं जातिम राम. ४०

द्विरोधस्फुरणादिवशाद्धूमत्वादौ गृहीतो धूमवत्त्विष्टाभावप्रतियोगितावच्छेदकत्वाभावो वह्नित्वादौ [redacted] उपनयमर्यादया गत्वते. अत एवानुमानादिनाव्यभिचारग्रहेपि न व्याप्ति
धीः निर्णीयात्वमिसाधारणे वादौ प्रविशेषाजन्योपनीतभाने संशयादिसाधारणस्य निश्चयात्वनीवा विपरी
तज्ञान मात्रस्येव प्रतिबंधकत्वात्. तन्नद्धूमादौ देशांतरवृत्तित्व संभावना विरहवशाद्दृत्यमारोगव त्वाय भाव
वह्नित्वाभावो धूमत्वायवच्छेदेन गृह्यते लोघवादित्यपि वदंति. हुताशनरासभादिपदार्थसार्थस्यान्वयव्यतिरेक
योरन्वयव्यतिरेकौ धूमस्योपलभमानो अवश्यमेतेषां अन्यतमकारणं धूमस्येत्यवधार्य संदिग्धे किमेतानि स
र्वाण्येव कारणानि किं वा कानिचित्त्वयाकानिचिन्नेति. तत्र च यस्य व्यतिरेकेपीतरेभ्यस्त्याविधेभ्यो धूमोत्पत्तिस्त
पलभते तेन स्यादेतुत्वमेवावधारयति. यथा रासभादेः यस्य व्यतिरेके तादृशात् परसकलान्वयेपि धूमानुत्पत्तिप
स्य / ति तस्य च कारणत्वमेव निश्चिनुते यथा वह्नेः तत्र चाकारणत्वसंदेहो विरोधितामासादयन्निवर्तते न

शि. रोम. ४१

तर्केणानुमाह॰ धूमइत्यादि॰ अनुसंधेयस्यावश्यंकार्यकारणभावग्रहः तदधीनत्वाद्व्याप्तिबुद्धेः सामानाधिकरण्ये नान्वय
व्यतिरेकग्रहाज्ज्ञायमानस्य तथैव बाहेतुहेतुमद्भावग्रहणतः तस्यैव व्याप्तिपरिच्छेदकत्वात्॰ विपर्ययतत्कोटिमात्र
पर्यवसायिनस्तर्कस्य तदभावकोटिशंकानिवर्तकत्वं अन्यथापदि वह्निं तद्धूमजन्यत्वान्तरेण स्यात्तज्जन्योन स्या
दित्यादेरपितथात्वापत्तेः तथापर्यवसायिताव कश्चिद्विशेषतो व्याप्त्या सामान्यतोपि क्वचित्तत्कूपधर्मे तावता
ते। तत्तेपत्तमेवाचवह्निसमवहिताजन्यत्वे नपक्षेऽविशेषणीयः। विशेषणावत्वेनोपस्थिते र्दिशिष्टाभावबुद्धे
र्विशेष्याभावमात्रावलंबित्वात्॰ तथोपस्थितिविरोधित्वाव ह्नेरित्यादिशंकाद्वयमग्रे निरसनीयम्॰ वस्तुतो
वह्न्यजन्यमपि वह्निसमवहिततजन्यं वह्न्यसमवहिताजन्यं संभवतीति वह्निजन्यत्वपर्यवसितं वह्निसमवहिततज
न्यत्ववाच्यम्। तथा चघटादौव्यभिचारवारणायापायकोटिप्रतियोगिविशेषणार्थकं समंतं। अजन्येजन्येच
नांतरीयवह्निकेव्यभिचारवारणायजन्यइति॰ तदर्थस्तु वह्न्यसमवाधानकालीनवह्नितत्समवधानेनस्यावत्का

राम. ४१

रणाजन्यत्वम्। तथा विधयावत्कारणकत्वमितियावत्॰ तथाचवह्न्यसमवहिताजन्यत्वेसतिवह्न्यसमवधानका
लीनवह्नितत्समवधाने तरयावत्कारणकोन स्यादित्यपर्यवसितोर्थः। एतन्नांतरीयकवह्निकेव्यभिचारवारणा
यापादकत्कोटावेवविशेषणं सत्यंतार्थः सच वह्न्यघटितसामग्र्यजन्यत्वमिति॰ तत्र॰ चाकृतत्प्रसिद्धेः। अत्राघा
त्यशंकाइष्टापत्तिपर्यवसिता॰ तत्तीयाउत्तरपादकाय प्रसिद्धिपर्यवसायिनी॰ अवह्नेः वह्निमन्मात्॰ तदुप
दानमिति॰ करणव्युत्पत्त्यातदीयकार्यप्रयोजककत्वानुपरम्। तादृशान्वयव्यतिरेकानुविधानबोधपरं वा॰ अ
ग्रेतानमपिस्वक्रियापरं तत्परमेव॰ कुत्पादेरव्यशंकाप्रतिबंधकत्वेमानाभावात्। कारणताग्रहोत्तरकारणताग्रहो
त्तरकालीनत्वाच्च। यद्यपिचैतावता धूमत्वावच्छिन्नंप्रतिवह्नेर्जनकत्वंनायाति॰ तृणारणिमणीनामन्यतमत्वेनैवैककल्पिक
कारणतापात्पित्तथात्वसंभवात्॰ तथापिविशेषयोः कार्यकारणभावग्रहस्तर्केणतद्विरोधिशंकापासनपत्नी
तायांज्ञायमानः सामान्यव्यभिचारानिर्णयात्तुगतान्गुरुविशेषरूपांतरानुपस्थितिलाघवप्रतिसंधानवशा

शिरोम॰ ४२

त्सामान्यत एवं तत्परिशिष्यते । प्रामाणिको वन्तेयेवान्वयव्यतिरेकौ फलबलेन च लाघवज्ञानादिरूपा व्याप्तेरेव सामान्य
व्यभिचारशंकायाः प्रतिबंधकत्वं कल्प्यते । परे तु धूमत्वावच्छिन्नस्य वह्निजन्यतेन जन्यत्वविशिष्टस्य व्याप्यत्वं तद्वह्निसम
वहिताजन्यत्वस्य व्यतिरेक एवापादनीयः । न चोक्तन्यायेन तादृशवह्नियुक्तकारणकलापजन्यत्वविशिष्टस्य व्या
प्यत्व वह्निसमवहिताजन्यत्वस्य व्यतिरेक एवापादनीयः । न चोक्तन्यायेन तादृशवह्नियुक्तकारणकलापजन्
त्वग्रहे तद्व्यतिरेकजन्यत्वशंकानिरासात् । वह्निविरहेपि निरतिशयस्यैव तादृशासमवहितस्य धूमजनकत्वग्र
हे तद्व्यतिरेकजन्यत्वशंकानिरासात् । वह्निविरहेपि निरतिशयस्यैव तादृशासमवहितस्य धूमजनकत्वसंदेहस्य
तथाविधाद्धूमानुमानादर्शनेनैवायोगात् । तादृशस्यैव कचिद्वह्निं कचित्तदितरहेतुसायत्तथाविधजनकत्वसं
भावनायां च कचिद्धूमानुमानादप्रयोजकत्वेनावच्छेदकत्व वह्निविरहस्यैव तथाविधसमवहितस्य धूमानुमानक्रिया
मात्रप्रतिलाघवात्प्रयोजकत्वानिर्णये नापत्त्यान्मनेसेव सुग्रहम् । वह्नेः वह्निसमवहितस्योपादानो । प्रयो राम॰ ४२

जकस्य वह्निसमवहितत्वानुपादानस्य प्रयोजकेतरजन्यत्वस्य ज्ञाने परं धूमस्य वह्निसमवहितोपादानस्य वा प्रयो
जकत्वं तात्पर्यम् । यत्त्वन्वयव्यतिरेकानुविधायित्वज्ञानमेव विशेषदर्शनतया शंकायां प्रतिबंधकं परे तु देवतर्क
घटकम् । तदितरस्तु कोयदि गृह्येतान्वयव्यतिरेके हेतुमितीति । तत्र याद्दच्छिकस्य तदनुविधानस्य व्यभिचा
रित्वाद्विपक्षस्य चोक्तावेदसंपादकत्वादिति वदंति । तच्चिंत्यम् । केचित्तु कार्यकारणभावग्रहानंतरं व्याप्तिग्रहा
य व्यधिकरणस्य जनकत्वशंकानिरासार्थमयं तर्कः । तथा च धूमो यदि सामानाधिकरण्यातिरिक्तप्रत्यास
त्त्या वह्निजन्यत्वे सति सामानाधिकरण्यप्रत्यासत्त्या वह्निजन्यो न स्यात् । प्रत्यासत्त्यजनकत्वात् । तादृशा
स्यतं च प्रत्यासत्तेतरशालि वह्निसत्वेपि धूमानुमानादिनायाद्यमिति । इदमेवाचोभंग्यंतरेणापरेपरिष्कुर्वंति । य
धूमो यदि वह्न्यनधिकरणदेशानुत्पत्तिकत्वे सति वह्न्यधिकरणदेशोत्पत्तिको न स्यात् । जन्यो न स्यात् । तादृशानुत्प
त्तिकत्व यहस्य धूमानुत्पत्तिं प्रति वह्निसंबंधाभावस्य प्रयोजकत्वे उपस्थितत्वात् लाघवात् तादृशासंबंधाभा

शिरोम. ४३ वस्यैव तथात्वावधारणादिति । तच्चिंत्यम् । मिश्रास्तु । परंप्रति व्याप्तिग्रहोपायेषु प्रदर्श्यमानेषु व्यभिचारशंकानिरासहे
तुत्वेनोपदर्शितेन तर्केण मूलशैथिल्यादिशंकोद्भावकं तं प्रति व्याघातोपमुपदर्श्य तेनेमे वंशंकिष्याः तथासति
तत्तत्कार्यार्थितया तत्तत्कारणे तवैव प्रवृत्तेर्व्याहन्येरन् । यद्वाहं न हिंस्यं भवति स्वयं वन्ह्यादिकमिति प्राकुः
तत्त्वेति । तत्र । व्यभिचारादर्शनं । व्यभिचारज्ञानसामान्याभावः योग्यतादिसंशयादिनाप्यर्थनिश्चयात् । तत्र
र्कस्वरूपमित्यपि केचित् । ननु वस्तुतो व्याप्तिसत्त्वे तर्काभासात्प्रमाण्वयोरुत्पादानुत्पादाभ्यां च व्यभिचारदर्शन
स्याह । विशेषदर्शनेति । तथा च यथा तत्स्वबोध्यतदभाववद्वृत्तित्वे सत्यसत्त्वे तथा तर्कस्यापीति । अत्र
सत्त्वादिसंपादकेष्वधर्मिणो बोध्यादिमत्त्वे बोध्यादिमद्धर्मीन्द्रियसन्निकर्षे वा तात्पर्यं लाघवात्तर्कस्य व्यभि
चारेणाहेतुतायाः स्वयमेव दर्शितत्वाच्च । अत्र यथाविपरीतज्ञानोत्तरप्रवृत्त्यहेतुत्वावच्छेदकत्वेन विशेषदर्शन
स्य हेतुत्वे तच्च तर्कस्यापीति चेत् । अस्तु तावदापाततस्तथापि तथाप्यन्वयव्यतिरेकप्रामाण्यादिप्रयोजककाले राम. ४३

वत्तत्र प्रामाण्याद्युपपत्तौ न तस्यापि विशेषतः कारणत्वं गौरवात् । उक्तं च विशेषणज्ञानस्य विशिष्टज्ञानका
रणत्वमते सर्वत्र विशेष्यसंबद्धासंबद्धविशेषणज्ञानमेव प्रमाभ्रमप्रयोजकमिति वदंति । तत्र प्रमाणेति । उक्त
नादिसिद्धज्ञानस्य प्रयोजकत्वमभिप्रेत्य । परार्थाभिप्रायेण वा । अनुमानत्वात् । व्याप्तिग्रहाधीनप्रवृत्तिकत्वात् ।
व्यभिचारशंकेति । द्वारेण च द्वारिणो नाप्यसिद्धिरिति भावः । अनुमानमात्रेति । अनिश्चितसाध्यपहेतौ
र्वत्रासंभवित्वात् । पक्षे साध्यनिर्णयेऽनुमानवैफल्यात् । उपाधित्वेनः स्वव्यभिचारेण व्यभिचारोन्नायकत्वेन
अनुमानोच्छेदकताज्ञानमेव साध्यव्यापकतानुद्धिं विरुध्यादित्याशंक्याह । अपि चेति । करवहीति । परमते
संस्वमते तु वाध्यादेः स्वशरीरानुपादिसाधने । प्रान्तमिति रिक्तविशेषणप्रहेयेण वा तद्ग्राह्यम् । उक्तव्याप्तौ नि
प्रतियोग्यसमानाधिकरणत्वविशेषणाविरहेण लाघवात् । अप्यसंयोगाभाववस्येव संयोगवद्द्रव्यस्यापि हे
तुसामानाधिकरण्यग्रहकालेऽनुमितिदर्शनात्तद्बाधितत्वं विशेषणीयमिति कलाघवम् । नन्वेवं प्रा

योग्यसामानाधिकरण्याद्यनुपस्थितौ हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वघटव्याप्त्यनुमितिर्न
स्यात्। न च प्रतियोगिसमानाधिकरणत्वेनाज्ञायमानायां तु हेतुसमानाधिकरणाभावाप्रतियोगि
तावच्छेदकत्वाभावग्रहो हेतुरिति वाच्यम्। तादृशाभावग्रहो न हेतुसमानाधिकरणाभावप्रतियोगितावच्छे
दकत्वत्वेन रूपेण प्रतियोगिसमानाधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वग्रहे तदसंभवात्। ना
पि प्रातिस्विकरूपेण। जन्मसहस्रेणाप्यसंभवात्। नापि रूपान्तरेण। वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य धू
मसमानाधिकरणप्रमेयेपि वह्नित्वानवच्छिन्नप्रतियोगिताकधूमसमानाधिकरणनिखिलाभावप्रतियोगि
तानवच्छेदकं वह्नित्वमिति ज्ञानादनुमितिप्रसंगात्। न च हेतुसमानाधिकरणत्वेन ज्ञायमाना इति वाच्यम्।
वह्नित्वे धूमसमानाधिकरणरासभत्वेनाभावप्रतियोगितावच्छेदकत्वभ्रमे पुष्कलरूपेण तथाग्रहसंभवात्।
धूमाधिकरणान्तरानुपस्थितौ वह्नितेरासभत्वादौ तादृशप्रमेयत्वादेरिव रासभादेरिव वह्नेरप्यनुमानापत्तेश्च

वह्नित्वावच्छेदेन प्रसक्तत्वाभावभ्रमदशायां प्रसक्तप्रतियोगिकवह्नीतरप्रतियोगिताकाभावे धूमसमानाधिक
रणाभावाप्रतियोगितानवच्छेदकं वह्नित्वमिति ग्रहेपि। एवं च प्रतियोग्यसमानाधिकरणहेतुसमाना
धिकरणाभावप्रतियोगितावच्छेदकत्वग्रहविरोधिग्रहविषयत्वेन तेषां तादृशावच्छेदकत्वग्रहविरोधित्वेन
तद्बुद्धीनोपायानुगमात्। विरुणद्धि च सामान्याभावबोधोपि सामान्यघटितविशेषवत्त्वबुद्धिं सत्यां हि घ
टो नास्तीति बुद्धौ जातायामपि नीलघटोस्तीति बोधानुदयात्। तत्कस्य हेतोः तद्विशिष्टप्रतियोगिमत्ताबुद्धिं
सत्यां हि घटो नास्तीति बुद्धौ जातायामपि नीलघटोस्तीति बोधानुदयात्। तत्कस्य हेतोः तद्विशिष्टप्रतियोगिम
त्ताबुद्धिं प्रति तदवच्छिन्नाभावबुद्धेर्विरोधित्वात्। अत्र आह हेतौ च नीलघटवत्ताबुद्धिरपि घटत्वविशिष्ट
दत्ता। अत एवावच्छेदकतत्त्वयोरन्योन्यासत्ताभावबोधयोरुपसंग्रहः। हेत्वाभासे च वक्ष्यमाणरीति
विरुद्धाप्यनुसंधेया। यदि च साध्यतावच्छेदकस्याभावप्रतियोगितानवच्छेदकत्वादिग्रहात्रानुमितिस्तदा तादृश

शिरो. ४५ दकत्वग्रहविरोधित्वमपि निवेशनीयम् । अन्योन्याभावस्याव्याप्यवृत्तित्वग्रहे तु स्वतन्त्रविशेषणत्वान्नमिति सम
म् । तथाप्यन्योन्याभावे प्रतियोग्यवृत्तित्वस्यैव विशेषणत्वम् । न च प्रतियोगितावच्छेदकसंबंधभेदानुधावनम
तोलाघवमिति वाच्यं तथैव प्रानुरोधितः अपरत्वमन्योन्यात्मताभावगर्भव्याप्त्योरेकतरग्रहेऽप्यन्यतरज्ञाना
दनुमितेरानुभाविकत्वात्तदुभयज्ञानमेव हेतुः । इन्द्रियसंयोगवद्विशिष्टस्यैव कार्यकारणभावान्न व्यभिचा
रः । यत्तु यद्रूपावच्छिन्नप्रतियोगिताकत्वेनोपस्थितोऽभावो धर्मिणि गृह्यमाणो साध्यवत्ताबुद्धिं विरुण
द्धि तद्रूपावच्छिन्नप्रतियोगिताकाभावसामानाधिकरण्यावगाहिनो ग्रहस्य विरोधित्वेन व्याप्तिरूपो
तु गमनीयाः प्रतिबन्धी तस्य साध्यतदवच्छेदकत्वं तान्योन्याभावग्रहो साध्यवत्ताबुद्धिं केवलान्वयिनि तु तादृश
सामानाधिकरण्यावगाहिनो भ्रमरूपस्यैव तदुद्धरस्य कथं विरुद्धसिद्धिरिति तच्चिन्त्यम् । साध्यतावच्छेदकेसा
धनसमानाधिकरणत्वं तत्ताभावप्रतियोगितावच्छेदकत्वावगाहि । साध्यतावच्छेदकावच्छिन्नसाध्यवत्त्वेन सा राम. ४५

ध्यन समानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकत्वावगाहीयो ग्रहस्तद्विरोधित्वं साध्याभाववद्वृत्तित्वसा
ध्यवदव्यवृत्तित्वोभयावगाहिग्रहविरोधित्वेनानुगमकं वाच्यम् । केवलान्वयिनि प्रसिद्धिः सर्ववत् । आधिक
हेत्वाभासेऽवसमाप्तिरीत्या बोध्या ॥ यथास्वमुपलक्षणपरः ॥ अनौपाधिकत्वमात्रव्यवच्छेदाय ॥ यद्यस
ति । अनौपाधिकत्वं तु लक्षणमिति ॥ इति वदन्ति ॥ व्यभिचारज्ञानस्य व्याप्तिधीहेतुत्वात् । व्याप्तिग्रहप्रतिबं
धकज्ञानविषयत्वेन व्यभिचारस्याभासत्वम् । सोपाधिकत्वज्ञानं तु न स्वग्राह्याभावविरोधि-विरोध्यविषयत्वा
त् किं तु व्यभिचारधीद्वारा । वस्तुतोऽनुमितेस्तत्करणज्ञानस्य वा साक्षाद्विरोधिन एवाभासत्वमिति ।
निरुपाधित्वज्ञानेन तु न व्याप्तिधीहेतुर्मानाभावात् । तथात्वे कापाधेराभासत्वापोगाच्चेति । इदं तु न विरोधाव
धेयम् । यद्दन्योन्याभावस्याव्याप्यवृत्तित्वे प्रतियोग्यवृत्तित्वविशेषणानतहृटितलक्षणस्य संयोगादिसा
ध्यकव्यभिचारिण्यतिव्याप्तिः संयोगान्योन्याभावस्य केवलान्वयित्वात् । अव्याप्यवृत्तिसाध्यकेऽत्वसा

पकसाध्यसामानाधिकरण्यमेव व्याप्तिः। अव्याप्यवृत्तिसाध्यके तु स्वव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगि-
ताकान्यतमाभावेन। तादृशरूपविशिष्टावशिष्टावच्छिन्नप्रतियोगिताकान्योन्याभावेन वा समं तस्य सामानाधि-
करण्यमिति चेन्न। स्मृतिसंस्कारजन्यज्ञानविषयत्वादिके केवलान्वयिसाध्यके तदुक्त्यव्याप्तेः। अथ यत्सामानाधिक-
रण्यं यत्किंचिद्व्यक्तिवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छेदकसाध्यवत्त्वं।
यद्धर्मविशिष्टयत्किंचिदधिकरणवृत्तिधर्मानवच्छिन्नप्रतियोगिताकान्योन्याभावप्रतियोगितानवच्छे-
दकसाध्यवत्कत्वे सति तद्धर्मविशिष्टत्वं वा सेति चेन्न। अत्र किंचित्त्वं संबंधेन तदधिकरणवृत्तित्वविवक्षिते सा-
ध्यतावच्छेदकसंबंधेन वा। आद्ये गुणः संदत्वादित्यत्रातिव्याप्तिः। गुणत्वस्य स्वरूपसंबंधेन संद्वृत्तितया त-
द्वत्त्वस्य तन्निष्ठतादृशान्योन्याभावप्रतियोगितानवच्छेदकत्वात्। द्वितीये समवायेन जातेः साध्यत्वे मे-
यत्वादावतिव्याप्तिः। जातिमदन्योन्यनिष्ठतादृशान्योन्याभावप्रतियोगितायाः जातिमदन्यत्वेनानवच्छेदात् जातिमत्त्वे राम: ४६

त्वमेयत्वस्य क्वापि समवायेन वर्तमानस्याप्रसिद्धत्वात्। एतेन यथा होवा रव्यातः। एवं तद्यावत्त्वेऽन्यतमाभाववद्गर्भल ह-
णामपि दुर्वचत्वात्। तथाहि। प्रतियोग्यनधिकरणीभूतहेत्वधिकरणनिष्ठान्यतमाभावेऽसाध्यादिगर्भमव्यापकमे-
वसंयोगादिसाध्यके द्रव्यत्वादौ। स्वाधिकरणयत्किंचिद्व्यक्तिवृत्तिप्रतियोगिकान्यतमाभावप्रतियोगितान-
वच्छेदकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्ये हेतुत्वमित्यत्रापि सर्वव्यक्तिगुणः स्पंदत्वात् ज्ञातिमान्मेयत्वादि-
त्यत्रातिव्याप्तिः। एवं स्वप्रतियोगिनिष्ठाधेयतानिरूपकहेत्वधिकरणवृत्त्यन्यतमाभावप्रतियोगितानवच्छेदक-
साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं हेतुत्वमित्यत्राप्युत्पत्तिकालावच्छेदेन जन्यानां द्रव्याणाम् जन्यानां च प्र-
लयावच्छेदेन संयोगनिष्ठाधेयतानिरूपकत्वापगमे संयोगसाध्यके द्रव्यत्वे कालपरिमाणे च हेतौ चाव्याप्ति-
रिति चेत्तत्पल्लवितेन। अत्र वदंति। साध्यसमानाधिकरणयत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदक-
त्वव्यापकस्वसमानाधिकरणतत्संबंधावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वकत्वं स्वसमानाधिकरणयत्से-

धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वव्यापकसाध्यसमानाधिकरणत्वमेवं धावच्छिन्नाभावप्रतियोगितावच्छेद
कत्वकत्वं वा। स्वसमानाधिकरणः सर्वैव यद्धर्मावच्छिन्नसमानाधिकरणस्तद्धर्मावलीढसामानाधिकरण्य
म्। साध्यसामानाधिकरण्याभावव्यापकतावच्छेदकत्वं स्वसामानाधिकरण्याभावसामान्यकत्वं वा व्याप्तिः। अत्र
च साध्यतावच्छेदकसंबंधेन साध्याधिकरणं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं तद्वृत्तित्वद्वयं चैकेन संबंधे
न विशेषणतया विशेषेण वा बोध्यम्। प्रसंगात्सामान्यलक्षणां व्यवस्थापयितुमाह। व्याप्तिग्रहश्चेति। केचित्तु
समानाधिकरणयोरेव व्याप्तिरिति पर्वतीयधूमे वह्निव्याप्तिविशिष्टधीर्न पर्वतीयवह्निव्याप्तिग्रहे विना
सच सामान्यलक्षणां विनाऽनेतिकथितव्याप्तिविशिष्टस्यादिलक्षणोपादानेऽपीत्याहुः। अत्र च सामान्यल
क्षणं स्वरूपं पस्पाइत्यर्थे सामान्यमेव प्रत्यासत्तिः सामान्यलक्षणा निरूपकं यस्याः इत्यर्थे तु तज्ज्ञानं· तत्रा
यमाह। सा चेंद्रियेति· इंद्रियेण संबद्धधूमादि तत्र विशेषणं सन्निहितविशेष्यकज्ञानप्रकारो धूमत्वादिरित्यर्थः।विशे

क्तिवादविरोधः जातौ व्यक्तौ च शक्तिः परं तु जातिविषयत्वेनैव ज्ञानाद्व्यक्तिं स्मारयतीति· अत्र तु भावप्रति चेति तदर्थोऽति
ति वक्ष्यमाणत्वात्। अतद्गुणसंविज्ञानबहुव्रीहिणा पव्यादिलिङ्गादिपदाभिप्रायेण।। परंपरीत्या चेत्यधिकं क्वचित्· वि
शेषणज्ञानसाध्येति न च परंपरातावच्छेदकज्ञानजन्यत्वापासिद्धसाधनम्· यद्धि शिष्टज्ञानं तत्तद्धीसाध्यमिति सा
मान्यव्याप्त्यादरणात्। अभावत्वप्रतियोगित्वयोस्तु परस्परयोरप्रकारत्वात्। वह्निविशिष्टज्ञाने तेन तद्वह्निविशिष्ट
ज्ञानेऽनेन वा तज्ज्ञानजन्यत्वसाधनाद्वा विशिष्टवैशिष्ट्याद्यभ्युपगमवादः। वस्तुतो विशेषणतावच्छेदकावीनां तु
णपदेंद्रियसन्निकर्षाद्वादृशप्रत्यक्षम्। अत्र तु मित्यादिस्थले तद्रूपेण व्याप्त्यादिग्रहात्· अन्यथा चानेकव्यक्तिकद्रव्या
दि विशेषणतावच्छेदकानुमित्यादेन तज्ज्ञानार्थं सामान्यलक्षणादरः। अत एव दण्डीत्यादौ प्रत्यक्षे दंडत्वादि
दंडसंयोगादानित्यादौ दंडसंयोगादिना यत्किंचिद्व्यक्तिज्ञानं कारणम्। दृष्टान्ताभावादिति· विशेषणज्ञानत्वेन

शिरोम· ४९

तुत्वस्य विशेष्यज्ञानादिकारणत्वापत्त्या मानाभावेन च निरस्तत्वात्. एतेनातद्विशेष्यज्ञानमपि कारणमन्यतो च
निर्विकल्पकमपि सामान्यलक्षणाया सार्वज्ञापत्त्या न स्यात्त्वजनकत्वे तु तत्तदेव बाधकाद्यजन्यकारणमिति परास्त
म्। प्रसिद्धधूमत्वादिर्धर्मिज्ञानस्य संशयहेतुत्वानंगीकारे पि संशयस्य धर्मिभानार्थं सा स्वीकार्या। धर्मिताव
च्छेदकप्रकारकज्ञानस्य प्रत्यासत्तित्वाभ्युपगमे तु विरोधात्॥ तद्धर्मप्रकारकज्ञानस्य तद्धर्माश्रयप्रत्यासत्तित्वोपगमा
त्। अत्र वदन्ति· प्रसिद्धधूमे धूमत्वेन व्याप्तिज्ञाने तद्धूमत्वेन वा· आद्ये संशये प्रसिद्धः द्वितीये धूमत्वावच्छेदेन व्याप्तिग्र
हस्यैव तद्विरोधितया संशयानुपपन्नः। कथमन्यथा पृथिव्यादिरूपे वायुत्वाभावव्याप्यता निर्णये पि रूपं वायुत्वाभाव
व्यभिचारि न वेति संशयः। न चातिरिक्तसंभावनया तत्र व्याप्तिविशेषनिश्चयोपस्थितानामतिरिक्तानां विशेषदर्शनाक्रान्तत्वा
तिरिक्तान्तरोपस्थितये अवश्यं सा स्वीकार्येति वाच्यम्। यतो रूपेषु नातिरिक्तत्वसंभवना तेषु विशेषदर्शनात्· नाप्यतिरि राम· ४९

क्ते रूपत्वसंभावना रूपान्यत्वरूपं द्रव्यात्मतयोः सातयोः न रूपम्· प्रसिद्धरूपभिन्नं पदरूपभिन्नं द्रव्यं रसादिर्वा तत्सर्वं न रूपं रूपत्वा
भाववद्वा इत्यादिविशेषदर्शनेन तस्याप्युपयोगात्· तदानीं चोक्तसंशयस्य सर्वजनानुभवसिद्धत्वात्। अतिरिक्तसंभाव
नाया गौरवेण प्रयोजकत्वाच्च। तस्मान्नैव धूमे रूपे वा धूमत्वरूपत्वाद्यवच्छेदेन व्याप्यग्रहात्। व्यभिचारसंशयोनानुक्तः।
यत्तु सामान्याभावभानार्थं सा स्वीकार्या तो विनाशकलतत्प्रतियोगिज्ञानासंभवादिति· तन्न· तदभावस्य ज्ञानमात्रे लौ
किकप्रत्यक्षे वा प्रतियोगिज्ञानं कारणम्· तद्सामान्यलक्षणापाइदं त्वादिना चभानेव्यभिचारात्· मानाभावाच्च· अत्र
एवेदन्त्वादिनोपस्थिते तत्तमसि भावत्वाभावत्वसंशयः। तेनोभावत्वेनोपस्थिते तद्योगात्· प्रतियोगिविशेषितं तज्ज्ञा
नं तु विशिष्टवैशिष्ट्यबोधमर्यादया ज्ञातिसिते। सकलप्रतियोगिविषयत्वं तु तस्याप्रसिद्धम्। प्रतियोगिज्ञानस्य हेतुत्वे पि
प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानादेव तत्संभवात्· यावत्प्रतियोगिज्ञानस्य गौरवेणाहेतुत्वात्। न
च तदभावबुद्धौ तज्ज्ञानहेतुत्वात्· यावत्प्रतियोगिज्ञानस्य हेतुत्वमर्यादायात्तम्· मानाभावात्· ध्वंसप्रागभावात्यन्ताभा

शिरो॰ ५९ वाः प्रतियोग्यादिप्रप्रतियोगिकाः हृष्याग्रहेप्येकथग्रहादैवगृत्यं त इत्युपगमाच्च॰ अंधकारस्तु तेजोविशेषसामान्याभावः
नाभावसमुदायः यावत्तद्भावानामेकत्रासंभवात्॰ अननुगमो हि रवात्तो न तेजोविशेषत्वादिनानस्पतेजस्सामग्र्याश्च
विरहे तेजोविशेषाणां तत्तीभावप्रागभावानां प्रत्यक्षानभ्युपगमाच्च॰ प्रागभावप्रत्यक्षोपि च प्रतियोगिह्निर्घटत्वादिप्रका
रकज्ञानं साध्योनप्रतियोगिज्ञानमपेक्षते॰ अत्र यद्यद्घटो भविष्यतीति प्रत्यक्षं प्रतियोगिविशेषितं प्रागभावमवगाहते:
न च प्रावीनास्तत्र प्रतियोगिनः। तत्प्रतियोगित्वावगाहने च भ्रमत्वम्॰ न चानागतेघटे प्रत्यासत्तिरमस्ति॰ अतः सा
मान्यप्रत्यासत्त्याय घटत्वेनानुभूतं स्मृतं तं च तदालंबते॰ न च चरमकारणरूपसामग्र्याध्वंसः प्रागभावो वा ध्येयो अस्य
दातद्प्रतसयात्॰ तस्याः स्वरूपसत्याः स्वरूपेणावाज्ञातायास्तथात्वेति प्रसंगात्॰ व्याप्यत्वेन गृहीताभ्यास्तया त्वं
वाच्यम्। तथा वत्तद्धेतुका प्रागभावस्यानुमितिरेव॰ तावत्कालं प्रागभावस्यासत्तेन प्रत्यक्षयोगाच्चेति वाच्यम्। या
दृशकारणाकलापानन्तरकार्योत्पादोदृष्टः तद्धेतुरेव व्यंजकत्वाभ्युपगमात्॰ अनुयोगिताविशेषादिरूपप्रागभावाना राम॰ ५५

ः क्वचिदप्यप्रतीतेनाद्भप्यरणानुगमानासंभवाच्चेति चेत्॰ भविष्यत्वं हि न वर्त्तमानप्रागभावप्रतियोगित्वम्॰ ध्वंसो भावि
त्यघो भविष्यतीतोनाद्भप्येयाप्रतिप्रत्ययप्रसंगात्॰ किं तु तत्स्वनेभविष्यतीत्यादेस्समानार्थकत्वात् वर्त्तमानप्रागभाव
प्रतियोगित्वसाधिकत्वम्। वर्त्तमानकालोत्तरकालोत्पत्तिकत्वं वा तत्त्वम्॰ न चेदमध्यक्षम्॰ उत्पत्तेरतीन्द्रियत्वात्॰ इहा
घटो भविष्यतीत्यादेस्तादृशोत्पत्तेरीदृशविशेषः कालविशेषस्याधिकरणत्वेन प्रतीयते न तु प्रागभावस्योत्पत्तिमती
वा॰ अत एव कपालनाशजन्यघटनाशस्य घटाद्यात्मकप्रागभावप्रतियोगित्वकपाले नेह घटध्वंसो भविष्यतीति बुद्धिः
न वा भवने प्रध्वंसः समुत्पद्य परागरोपरम्योगभिप्यत्तिमे वे प्रागरोपरम्यो भविष्यतीति धीः॰ अत उत्पत्तिरनुत्पत्तिः प्रत्यक्ष
ते॰ प्रत्यये न चैवं धात्वर्थनिष्ठेन तादृशप्रतियोगित्वं तादृशकालीनत्वं वा॰ नेष्टमिति न त्यनिष्ठ इत्यादौ च प्रत्यये न पर्याय
प्रमप्रागभाववर्त्तमानानामप्रतीतानामपोत्पत्तिः तस्या मेव च कालविशेषादि विशेषणत्वेनान्वेति॰ एतेन ध्वंसो भाविनाशे
ध्वोनं स्पन्नीतिनष्टेऽधुनस्पतीति व्यवहारस्यात्रस्यात्रनाशस्य विद्यमानत्वान्नेष्ट इत्यादिः न च तत्रानीतकालसंबंधित्वं राम॰

शि रोम· ५१

वर्त्तमानत्वं वा निष्ठाहेरर्थः। विरविनष्टेपि सर्वेषु विनष्टोप्यधुनापीति व्यवहारप्रसंगादिति परास्तम्। कर्त्तरि विहितेन क्ता
रव्यातेन कृतावाच्याम यमाश्रयत्वप्रतियोगित्वलक्षणं कर्त्तृत्वमाश्रयप्रतियोगिरूपस्य कर्त्तुरभिधीयते। कार्यानु
त्पादकक्षणयोगाभावध्वंसः सामयिकमत्यन्ताभावमवगाहते न च प्रतियोगिसमवायिनि समयावच्छेदेनात्यन्ताभा
वध्वंसो मानाभावः। भाविनि विनष्टे वा घटे इह कपाले यदो नास्तीति प्रत्ययापत्तेः। न त्वयं घटप्रतियोगिताकः। न च प्रागभा
वध्वंसौ न त्वा संभवतो वा। तत्र कपाले ततः सर्वप्रतत्स्वावयवानां घटानां न स्वत्वात्। उत्पत्त्समानत्वाच्च। अत एवैकपालादौ कथं घट
ध्वंसादिकमन्यतावुद्धिः। अत्यन्ताभावस्य ध्वंसाद्यविरोधित्वादिति केचित्। तन्न। तदधिकरणस्वरूपादिति विकारेवानुगतादभा
वाद्। इहेदानीं घटप्रागभाव इति च प्रत्ययोनलीकानाम्। अतएवं जातो घट इत्यादि वर्तमानो घटध्वंस इत्येव वित्त लक्षणप्र
यवलेन नाशोत्तिरिच्यतेन नु तत्प्रागभावः सर्वतत्सर्वत्वादि व्यवहारप्रवाती तेऽकालवृत्तित्वतदुत्पत्तिकालीनध्वंसप्रति
योगिकालवृत्तित्वादि विषयकत्वात्तु दुःखात्यन्ताभावस्य स्वसमिनुत्तरकालानुवृत्तित्वं दुःखसाधनध्वंससंवासमुदितस्य कि राम· ५१

१ सि

या विशेषप्रवृत्तिरस्तु प्रमाणान्तरसिद्धिप्रयोजनमुद्दिश्य पुमांसः प्रवर्त्तन्ते न तु प्रवृत्त्यैव तत्सिद्धिः। उत्पन्नत्वं तु वरुत्वादकाला
घवा कार्यादेः प्रतिबंधकत्वेनापि निरसनीयः। उत्पत्तिश्च महाप्रलयानंगीकारे स्वाधिकरणसमयध्वंसानधिकरणसम
यसंबंधः। तदुक्तं· आद्यक्षणयोगस्य क्षणयोगो जनिर्मतेति· क्षणः समयः। तदंगीकारे तु कश्चिद्दीपिततदीयसमयसंबं
धः। तदुक्तं· आद्यक्षणयोगस्य क्षणायोगो जनिर्मते। वत्समयवृत्तिध्वंसप्रतियोगित्वेनास्ति तस्य तत्समयसंबंधः। तद
धिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वं वा· क्षणान्तरपस्ववृत्तिध्वंसप्रतियोग्यनाधारत्वं स्ववृ
त्तिध्वंसप्रतियोगिप्रतियोगिकत्वाद्यत्वं सविशिष्टसमयत्वम्· स्ववृत्तिक्रियावद्भाव विशिष्टसमयत्वम्· स्ववृत्तिक्रियावत्त्वं स
विशिष्टसमयत्वम्। स्वस्वसर्ववृत्तिक्रियावत्त्वादार्थविशिष्टत्वं वा· स्वसर्वत्वं च स्वाधिकरणयावत्कालवृत्तिध्वंसप्रतियो
गित्वम्· जन्ममात्रस्यैव कालोपाधित्वाद्दोषः। यो यत्कालवृत्तिध्वंसप्रतियोग्यवृत्तिस्तस्य तत्कालवृत्तित्वमुत्पत्तिरि
त्यपि केचिदिति· चेत्रैव समयचांयत्रेकिंचिदस्माकमित्येकदेशिनो वर्णयन्ति। अयमपटस्य स्वानधिकरणोपुतं तदुत्पत्ति

वारणापसहस्रादीनां तंतुत्वेन तत्र तंतुत्वेन तत्र पटजनकत्वं वाच्यम्. तथा च लाघवादेक एव प्रागभावः कल्प्यते स च स्वाश्र
य एव प्रतियोगिजनक इति नातिप्रसंगः। इत्थं चानेकत्वप्रागभावसिद्धौ प्रागभावत्वेन प्रतियोगिजनकत्वाद्धि तंतुके
पि तत्सिद्धिरिति चेन्न त्रिचतुरैरेव तंतुभिः स्वन्तेषु संयुक्तेषु च तत्पटोत्पत्तिप्रसंगः। सावयवे तंतुवृन्दैः पटस्य कतिपयाविर
हेकयमनुत्पत्तिरिति चेन्न. न. कार्यानुत्पादस्य विना कारणविरहमनुपगमात् सामग्रीसत्त्वे अग्रिमक्षणे कार्यसत्त्व
स्यावश्यकत्वोपगमात्. तत्पटप्रागभावस्य यावत्तंतुत्वेन तत्पटजनकत्वमिति चेन्न. अवच्छेदककोटौ प्रागभावप्रवेशा
प्रवेशयोः कारणत्वे प्रमाणाभावः परस्परासंयुक्तेषु कतिपयतंतुषु पटोत्पादेन. न च तत्प्रागभावव्याप्ययावत्तं
योगानामपि जनकत्वम्. कतिपयतंतुसंयोगेषु अतीतेषु अनागतेषु वा पटानुत्पत्तिप्रसंगात्। तत्पटप्रागभावस
पि स्वसत्त्वपटोत्पत्तिमापात्। यावत्त्वस्यानिरुक्तेः स्वाद् एतेनाद्दित्वाद्युत्पत्तिर्व्याख्याता। परे तु नाशहेतुतावनीय पटध्वंसवदिदानीं
घटप्रागभाव इति साधारणमेव लोकानां प्रत्ययं कल्प्यं तत्तत्त्वेन प्रागभावं सामान्यलक्षणाव्यवस्थापयंतो व्य

यंति. अव्याप्यवृत्तेः कार्यस्य द्वितीयक्षणे. धारावाहनस्थले च प्रायमिकनिर्विकल्पकस्य चतुर्थक्षणोत्पत्तिप्रार
णामेकावच्छेदादिना कार्याभावस्योत्तरज्ञानाभावस्य च कारणत्वं वाच्यम्. तथा च लाघवात्प्रागभावस्य तत्त्वे कल्प्य
ते. तत्त्वभावाधीनाच्छत्वादैशिकत्वाद्दैशिकनियमः संयोगादीनामिति. अन्ये तु. सर्वत्र तत्क्षणव्यक्तिविशेषाणां
विशिष्य हेतुत्वोपगमेनैव तत्र द्रव्योत्पादनियमसंभवेपि युगपदुत्पन्नेषु निर्मेषु तद्वितत्तिशुध्याद्यनियामकत्वेन प्रा
गभावः कल्प्यत इत्याहुः। यत्तु ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहो न तद्रूपस्य तिं विनान्न चेच्छाकृतिकाले ज्ञा
नेच्छासाक्षात्कारे. योग्यविशेषगुणयोगपद्यस्याप्यनिषिद्धत्वात्. अतो ज्ञानाद्यनंतरं साक्षात्कार एव ज्ञानत्वादिनेच्छा
दिजनकज्ञानादिकं गृह्णातीति उपेयत इति. तन्न योर्व्वोपर्यपरिचये धर्मिस्वरूपग्रहेपि कारणत्वग्रहासंभवात्. इच्छाकृ
त्यनुत्पादस्थले ज्ञानेच्छयोः साक्षात्कारे ज्ञानेच्छासामान्यव्यतिरेकनियमेच्छाकृतिव्यतिरेकग्रहे मनसा कार्यकार
णभावग्रहस्यानुपपत्तेः। कृत्यनुत्पादस्थले पि ज्ञानेच्छयोः कृत्यनंतरमिच्छाकृत्योः सम्महाल च न साक्षात्कारस्य

शि॰रो॰ ५२ स्मरणेन ज्ञानानुमानस्य च संभवात्॰ विंशत्यंगुलत्वावच्छेदेन तु गवादिं शक्तिग्रहपोऽस्मादृशदिष्ठाकृतिकाले ज्ञानोत्पादे
प्यविरोधात्॰ गोत्वे च गोनिष्ठाभावाप्रतियोगित्वेन समवेतत्वेन च विशेषितमन विशेषितं वा गवेतरासमवेतत्वं व्या
प्यतावच्छेदकं न तु सकलगोवृत्तित्वविशेषितम्। सामान्यलक्षणया पि गृहीतुमशक्यत्वात्॰ ननु समानविष
मत्वे न्नापीति स्यादेतत्॰ समानप्रकारकतामात्रस्य प्रयोजकत्वे शुक्तिदपि रजतत्वप्रकारिकारच्छाकृचित्रेति निय
मो न स्यात्॰ तादृशप्रकारस्यपरतन्त्रत्वादोषगमने कथमरजते रजतत्वप्रकारिकेच्छाद्यनुपस्थिते वा संसर्गायहा
पि न नियामकः। वस्तुतो असंसर्गाग्रहमपेक्ष्य लघीयस्त्वाद्विषयत्वमात्रस्यैव नियामकत्वमुचितम्। सामान्य
तस्तद्दिच्छायां व्यवस्थितहेतुभावस्य तद्विषयकज्ञानस्य तत्प्रकारकत्वमवच्छेदकं कल्प्यते लाघवात्॰ अत एव
वा समानप्रकारकत्वेन व्यवस्थिते कार्यकारणभावे अतिप्रसंगवारणाय सामानाधिकरण्यमिव समानवि
षयत्वमेव प्रत्यासत्तिः असंसर्गाग्रहादेः कारणतामपेक्ष्य समानविषयत्वस्यावच्छेदककोटिप्रवेशोऽपि च लघीया राम॰ ५२

त्। कारणयथार्थत्वाय यथार्थत्वाधीनस्तु कार्यसत्यत्वाविधो विशेषः। एतेन रजतत्वप्रकारकेच्छायां तत्प्रकार
कं ज्ञानं संवादिन्यां स्यां तु दोषाभावसहितं विसंवादिन्यां तु उपस्थितरजतभेदाग्रहसहितं हेतुरिति परास्त
त्वदिस्यापि च संवादिन्या उपस्थितरजतभेदाभावसहितं विसंवादिन्यां तु उपस्थितरजतभेदाग्रहसहितं
हेतुरिति पराग्रहस्येव हेतुत्वौचित्यात्॰ दोषाशां रजतभेदाग्रहप्रतिबंधकानामभावमपेक्ष्य लघुत्वात् अत्रा
ङ्ग सिद्ध एव वस्तुत्वे वस्तुत्वेन रूपेरोच्छा लाघवात्तत्प्रकारकावच्छेदेन सिद्धत्वज्ञानमेव हि विरोधिः न च तत्प्र
ष्टते॰ तत्सत्वेऽप्यत्रेस्वयाप्यं नेगीकारात्॰ कथमन्यथा प्रोषितस्य ज्ञातकांतामरणस्य तत्कांतावलो
कनादाविच्छा कान्तावलोकनादौ नासिद्धत्वज्ञानात्॰ अतिरिक्तस्य चासत्वादित्यादि वक्तुतरमत्र ऊहनीयम्। अथ
सिद्धत्वे निश्चयाभावमपेक्ष्य लाघवादसिद्धज्ञानमेव हेतुः। न च सिद्धत्वेन ज्ञाने तत्संभवतीत्यसिद्धत्वज्ञानार्थमा
मान्यलक्षणेति॰ तत्र॰ विशेषरूपावच्छेदेन ज्ञानमेव सामान्यरूपेणासिद्धत्वग्रहसंभवात्। तदेकं ज्ञानं ज्ञानद

शिरोम. ५४

यं वेत्यन्यदेतत्. सामान्यलक्षणासहकारेणाप्यसिद्धस्य ज्ञातुमशक्यत्वाच्च. वस्तुतः सामान्यलक्षणं विनापि प्रा
कालः सुखप्रागभावाद्. सुखोत्पादकालीनध्वंसप्रतियोगी वा कालत्वादेतादृशकालत्वाद्वानुमानाद् सिद्धसु
खस्य तदसिद्धत्वस्य च ज्ञानं सुलभमेव. विशिष्योपपादयिष्यते चेदं शब्दमणिदीधितावितिकृतं पल्लवितेन. घटः
सद्दत्वादिसंशयसमानाकारो हि निश्चयस्तद्विरोधि घटो न वेति संशयश्च कोटितावच्छेदकघटत्वांशे निश्चया
ः। न च प्रमेयं वा नवेतिप्रत्ययस्तथा. अत एव ज्ञातिमान्नवेति निश्चयेऽपि घटो न वेति संशयः। घटत्ववान्नवेति निश्च
यस्तु घटेतरावृत्तित्वविशिष्टघटत्वमवगाहमानो घटान्यतासंदेहं विरुणद्धि पुरुषत्वाहत्रिवक्रकोटरादिनिश्चय
इव पुरुषत्वसंशयं। सामग्रीविरहादिति. घट इति निश्चयं प्रति घटत्वांशे निर्विकल्पकं ज्ञानं कारणं. ज्ञातित्वादि
ना घटत्वज्ञानेऽपि तदनुदयात् सामान्यलक्षणाया अपि सामान्यप्रकारकज्ञानजनकत्वनियमाद्विशिष्टज्ञानसाम
ग्रीसत्त्वात्. प्रसंगादुपाधिं निरूपयितुमाह. उपाधीति. सोपाधौ साध्यत्वसाधनत्वेन संभवतो नोऽभिमतेति रा.म. ५५

योऽपव्यापकत्वे सति यद्व्यापकः स तत्रोपाधिरिति निर्गलितोऽर्थः। व्यापकत्वाव्यापकत्वे एकरूपेणाविवक्षिते. नन्वप
धेः साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं तच्च यावदुपाधिव्यापकव्यापकत्वरूपाऽनौपाधिकत्वज्ञानाधीन
यात्वात् उपाधिव्यापकयावद्धर्मात्रयीतोऽपाधेः साध्यव्यापकत्वग्रहः साध्यनिष्ठव्याप्तिग्रहादित्यन्योन्याश्रय इ
त्यत आह. अनौपाधिकत्वान्तरग्रहादित्यनवस्थेत्यत आह. अनौपाधिकत्वेति. अन्योन्याश्रयपरमनवस्थापरमपि
तु संप्रदायः। अव्याप्यवृत्तीनां व्यापकत्वमुपपादयितुमाह। प्रतियोगित्वे चेति. तदधिकरणत्वनधिकरणत्वं तद
धिकरणावृत्तिरोधियत्प्रतियोगित्वं प्रतियोगिव्यधिकरणाभावप्रतियोगित्वं तदन्यत्वम्। प्रतियोगिव्यधिक
रणत्वेनाभावो विशेषणीय इति तु फलितार्थः। साधने इति. अनयोरसंकरेऽपि प्रदर्शयिष्यते. यद्वेति. पक्षे
उक्तरोपस्थितित्वकृत्तिहि भावप्रधानस्तन्निर्देशः। पक्षमितरयतित्यावर्तयत्वीति वृत्त्यतात तदृत्तिधर्मवत्त्वे
इत्यपि कश्चित्. तादात्म्येन धर्मिणो व्यापकत्वमिति तु परमार्थः। अत एवाग्रे पर्वतेतरान्यत्वादित्ति साधु संगच्छते।

शिरोम॰ ५५ इतरथाव्यापकाभावस्यैव व्यापकत्ववन्मोन्याभावस्यापि गमकत्वमावश्यकं संगमनीयम्॰ व्यतिरेकइति॰ यद्यपि व्या
५५ पकाभावस्तु द्व्याप्यागमकत्वे तथापि व्यर्थ्यं न दोषापातयापि वास्तवं तथापि व्यर्थ्यमन्यत्वे विशेषणांदेयमित्यर्थः। य
न्तु यथायोर्व्यतिरेके व्याप्तिस्तयोरेव व्याप्यवृत्तिव्यतिरेकिरगोरन्वयेव्याप्तिरितिनियमः। इदृव्यर्थ्यविशेषणतया व्यति
रेकेव्याप्तिस्तयोरेव व्याप्यहृत्ति व्यतिरेकिरगोरन्वयेव्याप्तिरितिनियमः। इदृव्यर्थ्यविशेषणतया व्यतिरेकव्या
भावादन्वयेपि न तथा त्वतः साध्याव्यापकत्वान्नायमुपाधिरिति भावः इति तत्रः अहेतुकत्वशरीरादेर्हेतुकत्वमो
व्यभिचारात॰ एवमपि संयोगादौ केवलान्वयिनि तु साध्येयहेतुरेति व्याप्तितादवस्याद्य॰ वस्तुगत्येति॰ तथा
वयहेतुसाध्यवति तदितरत्वं साध्याव्यापकं तद्दृत्तित्वेव बाधोन्नीतत्वादुपाधिरेवेति भावः। यद्विषयतया ज्ञानस्य
प्रतिबंधकत्वं तदेव प्रकृते उपाधित्वं वाच्यम्। नान्यं हेतुपदं कुत्वा न। अत्रउक्तरूपं न दानतद्दत्त्वयापत्तेतरस्यापि प्र
द्वाहेतु मितिमात्रो छेदइत्यभिप्रायवानाह॰ अस्त्विति॰ उपाधिमात्रमिति।। सत्रह्वोन्नायकतयाहृष्कत्वमितिमते राम॰ ५५

।।रितरस्यानुपहृत्वेतेरुद्धेशबोधः।। विपक्षेति॰ विपक्षव्यावर्त्तकधर्मान्तराविशिष्टपक्षेतरत्वव्यारणायनिवेषदृय
गर्भता। विपक्षव्यावर्त्तकविशेषणानवच्छिन्नसाध्यव्यापकत्वसाधनाव्यापकत्वशालित्वं विवक्षितमित्य
र्थः कापहेतेतरस्योपाधित्वमनंगीकुर्वतस्तवमे तेनातिव्याप्तिरभिहिता। वस्तुतो हृष्कृताप्रयोजकरूपवतस्त
स्यानुपाधित्वाभ्युपगमस्तद्वारणाय चविशेषणोपादानं हृषमपि न युक्तमित्यभिप्रायवानाह तथापीति॰ ना
वीजेत्वव्यभिचारादेरुन्नायकत्वम् अपितु सत्प्रतिपक्षस्यतच्च तत्र नास्तीत्यतो न उपाधिरिमाशंकते॰ अयेति,
व्यभिचारोन्नायकतया॰ व्यभिचाराद्युन्नायकतया॰ अव्याप्यतया॰ अव्याप्यत्वादिना॰ अव्याप्यत्वं अव्याप्यत्वादि
सत्प्रतिपक्षोत्तरवधिति॰ व्याप्तिपक्षधर्मतारूपबलसत्त्वेनैकेनापि वहूनांप्रतिरोधसंभवान॰ वहुत्वस्यावलत्वा
यअप्रमाणत्वबोधादेर्वहुत्वमपि वलमुक्तम् तत्र सत्प्रतिपक्षतायां किंत्वेकत्रांगभंगप्रसंक्षोव हूपुतत्कल्पने
गौरवमेकत्रचलाघवमिति तत्कोव्यापकत्तयेति नोपाधेः सत्प्रतिपक्षमुत्थाप्य तत्र हृषणत्वसंभवइतिभावः।।९

शिरोम॰ सत्प्रतिपक्षोन्नायकतया दूषकत्वे ।। बाधस्यानिश्चये साधारण्यादिनिश्चये चैवैयर्थ्यान्नाम्नातोऽप्युपाधिरितिश्चा
५६ शंकते॰ नन्विति॰ न्द्रेत्यमिती॰ ति॰ नचासंकीर्णबाधस्थले व्यभिचारः प्रतिरोधिव्यधिकरणसाध्याभावस्यैव तत्र ज्ञा
तेबाधत्वात्॰ तदनभ्युपगमाद्वा । अन्निजसंस्वविनेति॰ तत्तम शीलं विनाशुद्धसाध्यव्यापकस्योपाधेरभावादित्यर्थ
ः । तेन भास्वररूपमनुष्णत्वादेः रूपवत्तावच्छिन्नसाध्यव्यापकत्वरूपत्वादेः सत्त्वेऽप्यदोषः । नचैवं व्यतिरेकेणासाधा
रण्याद्यत्राभिप्रायाज्ञानजलादौ तु लत्वमदृशायां तेषात्वमित्यपरे॰ यद्यपि शातेनसत्त्वायद्दृश्यापां अप्रती
तसाध्यतदभावसहचारत्वरूपमसाधारणमिमन्ये॰ असाधारणोहि साध्यसहचारयहप्रतिबंधेनव्याप्तिग्रहप्रति
बंधः । व्यतिरेकव्याप्त्यादरेऽन्तु साध्यतदभावयोर्द्वयोरपिज्ञानद्विरोधात् सत्प्रतिपक्षोद्भावकतावीजम् । नचैवं अन्वय
व्यतिरेकित्वात्॰ नद्वितीयः सत्प्रतिपक्षेतदनवकाशात्॰ असत्प्रतिपक्षेतरेऽपि सत्प्रतिपक्षोन्नायकतयोपाधि
रेवेत्यासत्प्रतिपक्षोन्नायकत्वस्य हि॰ व्यतिरेकिणोऽन्वयादिना॰ नन्वेवं प्रागुक्तरीत्या व्यभिचारोन्नायकत्वस्य सत्त्वात् राम॰ ५६

पक्षेऽनुद्भावनीयतापत्त्यासत्प्रतिपक्षोन्नायकत्वस्य दूषकत्वस्यामवीजत्वेउपाधिर्दूषणमेवनस्यात्॰ वीजाभा
वात् तन्मात्रसत्त्वादिति॰ तदुक्तमुपाधेर्व्यभिचारोन्नायकत्वेति॰ भवतुवापक्षेतरेणोपाधिरूपादीपतां चतद्धा
तुत्वयेविपक्षाव्यावृत्तकेत्यादिकं विशेषणं तथापिलक्षणमतिव्यापकमेव॰ अरणोजन्यारणावोवास
कर्तृकाः कार्यत्वादित्यादौ अरणुभिन्नत्वादौ॰ नतुव्यभिचाराघन्नायकतामात्रेणोपाधित्वेव्यापकव्यभिचारित्वा
दावतिप्रसंगइत्यतआह॰ तथेति॰ तेनरूपेणस्वव्यभिचारेणस्वव्यतिरेकेणवादूषकतायांव्यभिचारस्यसत्प्र
तिपक्षस्यचोन्नायकतायामतिप्रसंगेनभंजिकायां साध्यव्याप्यत्वेवैयर्थ्यात्॰ साधनाव्यापकधर्मस्योपाधित्वे
साध्यान्वयव्यतिरेकोन्नायकान्वयव्यतिरेकशालित्वरूपं साध्यप्रयोजकं निपामकं अन्यथातिप्रसंगादित्या
शंकते॰ अन्यथेति॰ अभवतो असतः भवतः सतः । वैयर्थ्यादिति॰ नचैवंपक्षेतरत्वेऽतिप्रसंगः । तथापिपक्षेतर
साध्यवत्त्वादावतिप्रसंगात्॰ विषमव्याप्तिकस्यानुपाधित्वे मेयाभावेनियामकं शंकते । अन्यथेति॰ उपसमीपवर्ति

शिरोम. ५७ निष्ठादशातिस्वीयरूपमिति तूपाधिः। यद्धर्मबोधकशब्दसमभिव्याहारेण चोपाधिपदं प्रयुज्यते तद्धर्मसंक्रामकत्वे
न तद्बोधयतीति। यथा स्फटिके लौहित्ये जपाकुसुममुपाधिरित्यत्र लौहित्यसंक्रामकत्वं प्रयुज्यते च शास्त्रे व्याप्यत्वबो
धकशब्दसमभिव्याहारेण यथात्र साधनेऽसातुपाधिरित्यत्र व्याप्तिसंक्रामकत्वलाभः। यदभावइति। अस्तिता
वदिहहेतावुपाधिर्महोपाधिरिति प्रतीतिर्व्यवहारश्च तावालंब्य चेदं लक्षणवाक्यं। तत्र यदि साधने उपाधिव्य
भिचारो व्यभिचारेण तद्व्याप्यत्वव्याप्यात्ते वा पदिवाने न संबंधेन तद्वत्यद्वत्रीएव तद्दलेवन सुभयथापि नेह हे
तिः। यदभावशब्देनापि तथैवव्युत्पादयितुं शक्यत्वात्। यदभावस्य व्यभिचारविरोधित्वम्। तत्त्वे स्वाश्रयं व्यभिचारविर
हः। तद्विरहिणि धर्मे चावश्यं व्यभिचारसत्त्वेन तत्त्वे वावश्यं व्यभिचारविरहः। व्यभिचारविरहविरहिणि धर्मे तत्त्व
वश्यं तत्त्वमिति वा। ईदृशस्य विरोधो न विषयव्यापकाभावस्य तत्त्वेपि व्यापक एव व्यभिचारात् तानापि
विषमव्याप्याभावस्य साध्य एव तद्विरहेपि व्यभिचाराभावात्। तादृशधर्मस्य चोक्तसंबंधे न उक्तत्वे वंधस्य वाप्य रा.म. ५७

हत्त्वित्याद्युपाधिः सत्त्ववसोपाधिः। अत एव तदभावलक्षणगमनेोपाधिकत्वं व्याप्तिरिति गीयते विरोधघटक
दलद्वये चैकैकस्य व्याप्तिशरीरघटकतया हृष्यकतावनस्यादितुभयोपादानमिति सर्वेसुस्थम्। यदि च सम व्या
प्ताकाशोभयमात्रवृत्तिधर्मेणाकाशस्योपाधित्वं वारणीयं तदा यत्पदं वृत्तिमत्परं बोध्यम्। अत्र च व्यभिचारस्य
घटकत्वेऽप्यमेयत्वपदं व्यतिरेकिधर्मोपलक्षणम्। अथ तादृशोपाध्यभावस्य व्याप्तिलक्षणत्वे यत्र व्यभि
चारित्वेन तत्संभवस्तत्राति व्याप्तिस्तस्यास्तत्र सत्त्वेनाभावानिरूपणे तु तत्र तत्सत्त्वेनाव्याप्तिरतस्त्राहव्य
भिचारे वेति। यस्य यद्व्यभिचारस्य यद्व्याप्यत्वस्य वाऽभावः साध्यव्यापके व्यभिचारविरोधी स सविनाव्याप
क उपाधिरित्यपि वदन्ति। यद्व्यभिचारित्वाभावः साधने साध्यव्यभिचाराभावापादकः स साध्यव्यापक उपाधिरि
त्यपि केचित्। ननु यद्व्यतिरेकेऽहेतिपद्व्यतिरेकेऽनुमितिप्रयोजककृत्व्यासाधन्यतमं संभवत्येव। यथा अस्ति
द्धव्यतिरेके सिद्धिरित्यर्थः। विरुद्धत्वादेरिति। विपक्षमात्रगामित्वसपक्षविपक्षगामित्वलक्षणविरोधव्यभि

शिरो· चारयोरैकैकविरहे पि व्याप्तेरनियमादित्यर्थः॥ साधन इति॥ यत्र पक्षे हेतुमति च साध्यं हेतुश्च पक्षवृत्तिस्तत्रैकः
५८ पक्षवृत्तिर्हेतुसमानाधिकरणः॥ अपरश्च पक्षनिष्ठः साध्यवति हेतुसमानाधिकरणः हेतुसमानाधिकरणा
एव सा उपाधिस्तत्र साधनपक्षधर्मावच्छिन्नसाध्यव्यापकयोरसंकरो बोध्यः यथायं वायुः प्रत्यक्षो बहिर्द्रव्यत्वा
द्धिस्तुत्वाद्वेत्यादौ साधनावच्छिन्नसाध्यव्यापकमात्मत्वं पक्षधर्मावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं प्रत्यक्ष
स्पर्शाश्रयत्वं वा मिथो संकीर्णमुपाधिः॥ अत्रावरोणेति घटो मेयो द्रव्यत्वादित्यादौ गंधवत्त्वावच्छिन्नसाध्यव्याप
कः पृथिवीत्वादावतिव्याप्तिर्द्रष्टव्या· नवा तेन रूपेण ज्ञातस्य दूषकत्वमित्याह॥ आर्द्रेंधनेति· पक्षधर्मेति· विरुद्ध
स्थलीयोपाध्यव्याप्तिरपि द्रष्टव्या॥ साधनावच्छिन्नेति· स्वावच्छिन्नेत्यर्थात्साधनवत्तावितिविशेषणाद्दानव्यभि
चारः॥ ननु शुद्धसाध्याव्यापकस्य लक्षणासिद्धिः शंकाविरासायावच्छेदकांशो निवेशनीयः॥ अखंडाभावस्य च व्याप
कतयाने वैयर्थ्यमन्यनेन रूपेणोपाधितादिविशेषणवति तद्व्यावच्छिन्नव्यभिचारे सैव वा हेतुलक्षणा शुद्धसाध्यव्यापकस्थले राम·
५८

तु साध्यव्यापकव्यभिचारो व्यापकतावच्छेदकार्द्रेंधनत्वावच्छिन्नव्यभिचारो वा हेतुरुपन्यसनीयः प्राप्त्यशास्तद्धर्मवति
तद्धर्मविशिष्टसाध्यव्यापकव्यभिचारित्वस्य हेतुत्वे पि न वैयर्थ्यम्॥ अखंडाभावस्यातिरिक्तत्वात्॥ वस्तुतस्त
उपाधिनाम साधकत्वात् साधने पि न क्षतिः॥ उद्भावितयावद्दोषैरेव तत्साधनीयमिति नियमाभावात्· तद्व्य
तव्यभिचारेण तत्साधनसंभवात्· संदिग्धोपाधिमशीलत्वसंदिग्धो व्यभिचार इत्यत आह॥ किंचेति· केवलेति·
तथा च केवलस्येव साधनसंभवात्· संदिग्धोपाधिसमशीलत्वसंदिग्धो व्यभिचार इत्यत आह॥ किंचेति· केवले
ति· तथा च केवलस्येव साध्यस्य व्यभिचारो व्यतिरेको वा ज्ञातो विरोधित्वात्तद्विशिष्टस्य विरोधितादि
ति भावः॥ उद्भाव्यः॥ विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभिचारेण साधनीय इत्यत्र च विशिष्टसाध्यव्यभि
चारे सिद्धो तु द्भावितायां॥ तत्सिद्धये उपाधिरुद्भाव्य इति· तर्हीति· प्रकृतानुमानविरोधि शुद्धसाध्यव्यभिचारसा
धकत्वादिति भावः॥ अयमेव समारोपितस्यावच्छिन्नसाध्यव्यापकेनाप्युपाधिना हेतौ च शुद्धसाध्यव्यभिचारः साधनीय इत्यत्र

शिरो. ५९

आह॰ किंचेति॰ पक्षधर्मावच्छिन्नेत्यादिकस्तूपाधिमात्रव्यभिचारोपलक्षकं नोपाधिः। न प्राधान्येनोपाधिः व्या
प्याद्विविरहेणाहेतुत्वात्॰ पर्यवसितेति॰ अत्र लक्ष्यतानियामकं दूषकताबीजं च सत्प्रतिपक्षोत्थापकत्वम्॰ व्य
भिचारोन्नायकस्य तत्त्वे साध्यवत्पक्षावृत्त्यावृत्तुपाधौ व्यभिचारोन्नायके अव्याप्तेः। वस्तुमात्रावृत्तकत्वो
पाधेरदूषकत्वापत्तेश्च नहि तद्व्यभिचारेणाहेतोस्तु तुसाध्यव्यभिचारः शक्योन्नयनः बाधानवतारदशायां ता
दृशव्यभिचाराप्रसिद्धेः। न च पर्यवसितसाध्यव्यभिचारः साध्यव्याप्यताबाधस्य विरोधीति॰ नचैवमपि कथं
तत्र संदिग्धत्वादुपाधिसंभवः। मीमांसकमतेन तादृगभिधानात्॰ शब्दशब्दयोर्भावप्रधानत्वाद्वा। पक्षतावच्छेदकोपा
धितावारणाय पक्षावृत्तित्वे सतीति निवेशनीयम्॥ यद्वेति॰ एतच्च स्वतंत्रदूषकत्वसाधनदशायां बोध्यम्।
अनित्यत्वसाधने नोपयोगितयानुदूषकत्वसाधने द्वयोरपि संदिग्धत्वे नैकतरव्यतिरेकस्यान्यतरव्यतिरे
कासाधकत्वात्॰ एवं हीत्यादि॰ असमवेतत्वेन द्रव्यासमवेतत्वेन वाऽर्थान्तरवारणाय सावयवत्वेति॰ साध्ये राम. ५९

व्यपदेशं नित्यद्रव्यवृत्तिगोपाः स्फुटतरसिद्ध्यर्थं द्रव्यसमवेतेति नित्यद्रव्यासमवेतत्वस्यानित्यद्रव्यसमवेतत्वमात्र
येव पर्यवसानात्। हेतोः स्पष्टव्यपदेशपरमाणुनित्यत्वासिद्धिदशायामाकाशादेर्व्यावृत्त्यर्थं हायाऽविशिष्टाभावस्य
वातिरिक्तत्वात्। नचैवमप्यर्थे नित्यमहत्त्वव्यावृत्त्या नित्यावयव्यमहत्त्ववृत्तिजातिपरिचयायतदिति तु न॰ तादृशजा
तौ प्रमाणाभावात्। नचैवमपि क्रियापकर्षव्यवहारस्याननुगतजातिभिरेवसंभवात्तुल्यन्यायतयात्र सरेणु
त्वापकृष्टोत्कर्षेणैकजात्यासंकरप्रसंगाच्चानित्यस्पर्शेति॰ साध्योपाध्योर्व्याप्तिहार्दप्रदर्शनाय स्पष्टव्यपदेशागमकता
तु तेन विनापि॰ पर्यवसितसाध्यसमव्याप्तत्वोपाधिरितिमतेनेदमित्यपि कश्चित्। ननु भवतां मतेऽपि साध्यव्या
पकं स्पर्शवत्समवेतत्वं कथं नोपाधिः। अत एवस्याभियाकस्य चित्रिरूपवत्स्पर्शवतः सिद्धौ तत्समवेतद्रव्ये सा
ध्याव्यापकत्वादिति चेत् तुल्यममापीत्यत आह। किंचेति॰ सोपाधौ सोपाधितया निश्चिते। न तु लभ्यत्वलाभमपी
ग्यता॰ यत्र हेत्वादेः साध्ये संदेहस्तत्र तद्व्यापकत्वसतिपक्षावृत्तित्वं॰ पक्षसाध्यसिद्धिविरोधिव्यापकताशालित्व

शिरो०
६०

मितियावत्। स्वव्यतिरेकेणापक्षे साध्यसिद्धिविरोधस्तून्नायकत्वमिति तु निगर्वः। भवति च शावृधर्मातिरिक्तध
र्मे दृष्टे तेन शब्देऽनित्यत्वाभावसिद्धिर्यथोक्तसाध्यसिद्धिविरोधिनी तथा साधनादिस्तति साधनाभाववद्वृत्तित्वसाध्या
भावसिद्धिरपि। वस्तुतस्तु पक्षेतरधर्मावच्छिन्नसाध्यव्यापकत्वे सति पक्षावृत्तित्वमेवोपाधित्वम्। सिद्धान्तिपवि
शेषणवति विशिष्टसाध्यव्यापकव्यतिरेकेण शुद्धसाध्यव्यतिरेकः। नाह्यत्र साधनव्यापकः। संग्राह्यो व्यभि
चारोन्नायकः स्वपक्षेऽप्यतिरिक्तेतरेषां परेषां सत्प्रतिपक्षोन्नयनक्रमस्य साधनव्यापकस्यैवास्माकमपि व्यभि
चारोन्नायकस्य पक्षे हेतोः संग्रहो न होषायपरेषां साधनभेदाद्विवास्माकं पक्षे भेदादुपाधिभेद इति चेत्। अत्र व
स्तुतेनैव पक्षेतरेण लक्षणावच्छेदकमाह। यद्व्यभिचारित्वेनेत्यादि। उन्नीयत इति शेषः। उन्नायकत्वं तद्योग्यता। सा
च व्याप्तिपक्षधर्मतान्यतरवद्व्यभिचारः। यद्धर्मावच्छिन्नाभावाधिकरणीभूतयत्किंचिदधिकरणवृत्तित्वं सा
ध्यव्यभिचारव्याप्यं साधनस्य वृत्तित्वं तद्धर्मावच्छिन्नत्वेन सोपाधिरित्यर्थः। तेनार्द्रेन्धनाभाववद्वृत्तित्वेन वह्नेर्धूमव्य राम
६०

व्यभिचारी साध्ये नार्द्रेन्धनेद्रव्यत्वादिना न चोपाधिः। तद्रूपावच्छिन्नाभाववद्वृत्तित्वस्य च स्वावृत्तितया। शुद्धसाध्यव्याप
केन तदभाववन्मात्रवृत्तित्वसाध्यव्यभिचारव्याप्यं अत्र वह्निरूपसाध्यव्यापकेन तु अवच्छेदकाधिकरणीभूततदभावा
धिकरणवृत्तित्वमिति भयत्रापि संगतिः। द्रव्यत्वेन रूपे साध्ये सत्त्वाद्रव्यत्वजलत्वमात्रविशेषिकायाधीस्तादृशोव्य
त्वेजलसमवेतनित्यत्वे वा सति पृथिवीत्ववद्वृत्तित्वादित्यादिनाप्रकारेण व्यभिचारोन्नयनसमर्थोऽपि पृथिवी
त्वाभावादिर्नोपाधिः। नहि पृथिवीत्वात्मकतदभावाधिकरणं तादृशं किंचिदस्ति यद्वृत्तित्वसामान्यं साध्यव्य
व्यभिचारव्याप्यम्। पृथिवीत्वादौ वेद व्यभिचारात्। न च व्यभिचारोन्नायकतामात्रेण प्रकृतोपाधितानिर्वा
हः। अपि तु कथकानां तात्त्विकारणं च तथा विधव्यवहारविषयत्वेन। तदवच्छेदकं च यथोक्तं रूपम्। व्याप्यत्वासि
द्ध्युन्नायकत्वादिकं संभवदपि न तथा गौरवात्। अत एव देहजलमात्रकाशादिसाध्यत्वाव्याप्यत्वेन गन्धत्वाव्याप्यत्वो
न्नायकस्यापि द्रव्यत्वादेरसंग्रहो न दोषाय॥ अथैवं स्वव्यभिचारेण व्यभिचारोन्नायकत्वमेव तथा सत्यपि वा

शि. रो. ततन्नोक्तोपाधावव्याप्तीति चेत्। एवं तर्हि साध्याभावसाधनोभयाधिकरणवृत्त्यभावप्रतियोगित्वमेव तथास्त्वि
६१ ति लाघवात्। अस्तु वा सहार्थे तृतीया अपरोनास्यापि स एवार्थः। न द्रव्यमात्रज्ञाने तेषां नोपाधिव्यवहार इति
चेत्तत्तुल्यमिदं त्वदुक्तेपि अत एव शुद्धसाध्याव्यापकस्थले साध्यव्याप्यतावच्छेदकं नियमतस्तादृशधर्ममनुस
रंतीति ते यद्वृत्तिसाध्यव्यभिचारस्तन्मोभवति उपाधिव्यभिचारस्य। वस्तुतस्तु यदभावेन यद्वृत्त्यत्वेन वा सा
धनवति साध्याभाव उन्नीयते स उपाधिर्लाघवात्। अत एव जलत्वतेजस्त्वोपाधिर्न तत्तदुभयत्वेन क्वचित्स्पृपवित्वे
यद्व्यभिचारित्वेनेत्यस्यापि स एवार्थः। तथा हि। यद्व्यभिचारित्वेन हेतुमद्वृत्तित्वविधया साधनस्य पक्षताव
च्छेदकीभूतं तत्स्वसाध्याभावरूपसाध्यवत्त्वसहवृत्तित्वं सिध्यतीति। अत्र च साध्यसमानाधिकरणत्वेनावच्छि
न्नो धर्मो साध्यासमानाधिकरणादि धनी दिव्यक्रेरादि धनत्वादिर्नोपाधिस्तेषु न एवच्छेदकधर्म एव साध्यस
मानाधिकरणवृत्तित्वेन वा विशेषणीयः। तेन जलद्रवत्वाभावाधिकरणायोगोलकवृत्तित्वस्य धूमव्यभिचा राम.
६१

रव्याप्यस्य वह्निवृत्तित्वेपि जलद्रवत्वेनातिप्रसंगः। न वा द्रव्यत्वेन तेजस्त्वसाधने शीतस्पर्शजलत्वाद्यात्मकस्याभावे
न तद्वृत्तेन वा द्रव्ये द्रव्यत्वे साध्याभावस्य व्यभिचारस्य वा साधके स्पर्शाभावजातस्याभावो द्रव्यत्वादिनानुकं दुष्या
वा दिमत्त्वादौ साध्ये स्वव्यभिचारेण साभावेन याहेतौ तद्वृत्तित्वाव्यभिचारस्य साध्याभावस्य वा साधकं घटत्वा
दिव्यभिचारित्वमुपाधिरेव घटत्वादेस्तदभावस्याप्यागमकत्वेपि धूमप्रागभाववदवैयर्थ्यं न चाभावस्यानु
पाधितापत्तिः। प्रतियोगिनस्तद्वृत्तित्वस्य वा हेतुत्वादिति वाच्यम्। तस्याप्रवेशेपि वस्तुतो यदभावस्य तद्वृत्ति
त्वस्यैव हेतुत्वान्न पापात। तदभाववद्वृत्तित्वेनोपस्थितावपि तद्वृत्तित्वेनानुपस्थिते व्यभिचारसाधनेन वैयर्थ्य
मित्यपि वदंति लक्षणमाह। पर्यवसितेत्यादि। पर्यवसितं पदार्थमाह। यद्धर्मेति। यद्धर्मवतीत्यर्थः। नन्वेवं सद्धेतौ
सपक्षैकदेशवृत्तित्वे धर्मेतिप्रसंगः। अव्यापद्धर्मावच्छेदेन साधनवति साध्यं प्रसिद्धं तद्धर्मावच्छिन्नसाध्यव्यापकत्व
साध्यसाधनसंबंधव्यापकत्वमिति पावत्तविरुद्धमात्रे वोपाधिविरहेपि न क्षतिः। लक्षणावच्छेदके च साध्यसामा

शिरो. ६२

नाधिकरणत्वेन साधनं तादृशवृत्तित्वेन वा साधनतावच्छेदकं विशेषणीयम्। साधनव्यापकीभूतधर्मावच्छिन्न
साध्यव्यापकत्वं वा विवक्षितम्। विरहेऽपि साधनव्यापकेनानन्तत्वादिनावच्छिन्नस्य साध्यस्य व्यापकत्वमस्ते
वोपाधीनां प्रमेयत्वादिनावाप्यादोषप्रसक्तेस्साध्ये उद्भूतरूपत्वादिकं नोपाधिः। लक्षणतावच्छेदकवाक्यस्य प्रयोजक
त्वमाचिन्तनीयावता यद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारनियमस्तत्पर्यवसानात्। मैवम्। जनकत्वेन
वह्नौ कार्यानुकूले व्यापारात्मकशक्तिसाधके वहिरिन्द्रियेन्द्रियाप्रत्यक्षत्वस्योपाधेः प्रत्यक्षत्वेनोद्भवविषयमात्रत्वावत्त
स्य च गुरुत्वात्मकसाध्यसाधनस्याधिकरणे घटादावव्याप्तेरुक्तरूपाभावादेवंविधव्यवहृतत्वेऽपि विरोधात्। तद्व्यापकताव
ज्ञस्य तत्रापि संभवाच्च। अत्राहुः। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमवच्छेदकत्वेन
सामानाधिकरण्येन। न चैतद्धूतत्त्रैकालीनत्वसामानाधिकरण्यविशिष्टरूपवत्त्वेन तद्धूतत्वेन तन्मानमपि तद्धूतान्यत्वं
तद्व्यापकं। येनापि वीतत्वेन रूपे साध्ये तद्धूतत्रैकालावच्छिन्नरूपव्यापकतयोपाधिः स्यात्। स्वानधिकरणीभूतसा रा.म. ६२

धनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं वा। यद्यपि तु द्रसाध्यव्यापकस्य लेशावच्छिन्नसाध्यत्वेन नव्याप्यतातया
पि तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वादिरूपतद्व्यापकत्वमक्षतमे
व गुणत्वादिना प्रत्यक्षत्वेन साध्ये उद्भूतरूपत्वं घ्राणजन्यत्वाद्यवच्छिन्नसाध्यव्यापकं भवतीति वोपाधिः। एवं च यत्रैव सा
न्नधिकरणे साधनस्य साध्यव्यभिचारो यत्र च स्वाधिकरणे साध्यं तदुभयमात्रवृत्तिर्यो धर्मस्तद्वत्तित्वव्यभिचारेण सा
धने साध्यव्यभिचारः साधनवृत्तित्वात् तद्धर्मवृत्तेस्तत्तदभाववत्त्वेन साध्याभावः साधनीयः। साध्यासमानाधिकर
णस्य साध्यव्यापकाभावस्य वाधिकरणीय साधनवन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरण
त्पत्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वमुपाधित्वं। एवं च साध्यसमानाधिकरण
त्वेनैव साध्यवद्वृत्तित्वपारणसंभवपर्यवसितसाध्यव्यापकत्वाभिधानेऽनुव्यापकाभावेन व्याभावावश्यंभावदर्श
नार्थं न तु साध्यकतत्साधनकसकलोपाधिसाधारणं चेदम्। साध्यव्यापकत्वसाधनाव्यापकत्वावच्छेदकरूपा

शिरो॰ ६२ नतिरिक्तवृत्तिसाध्यसमानाधिकरणयत्किंचिद्धर्मव्यापकतावच्छेदकरूपवत्त्वमुपाधित्वम्। अवच्छिन्नसाध्यव्याप
कोपाधौ चातः साध्योपाधिस्वरूपा साधनवत्तावृत्तिर्व्याप्तिस्तद्वृत्तित्वमेव तादृशरूपमिति वदन्ति। रूपादिसाध्यक
घटत्वादिहेतौ पृथिवीत्वाभावादेरुपाधितापत्तेर्हेतुत्वविशिष्टसाध्यानधिकरणीभूतसाधनाधिकरणवृत्तित्वमव
च्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम्। अत्र च तद्वैकल्यप्रविष्टा या साधनव्याप्तिस्तद्व्यापकत्वं बोध्यम्। तेन
रूपादिना गुरुत्वादौ साध्ये पृथिवीत्वाभावादौ नातिप्रसंगः। विवेचयिष्यते चेदमुपरिष्टात्। साध्यासमानाधिक
रणस्य साध्यव्यापकाभावस्य वा समानाधिकरणं यत्साधनं तन्निष्ठप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्य
धिकरणात्यन्ताभावप्रतियोगितावच्छेदकसाध्यसमानाधिकरणवृत्तिधर्मवत्त्वं वा। एवं चावगते साधनवृत्तिसा
धनेवा साध्यासमानाधिकरणधर्मादिना साध्यासमानाधिकरण्येन वा साध्याभावो व्यभिचारो वा शक्यते ज्ञातु
मिति ध्येयम्। उपाधिशरीरभानस्य साधननिष्ठसाध्यव्यभिचारादिविषयत्वसहितस्तु तायां तु साध्यव्यभिचारित्वे राम॰ ६२

न साध्याव्याप्यत्वे न वा साधनं विशेषणीयम्। मित्रातनयत्वव्यभिचारित्वेनैव शाकपाकजत्वादेर्लक्षणे पर्यवसितेन श्यामत्वादिकं तु व्य
भिचारोन्नायकतावच्छेदकरूपप्रदर्शकं न च प्रवृत्ती केवलधर्मेऽर्हतायां पक्षधर्मतापापदर्शनायम्। एवं चापमेतन्साधन
निष्ठसाध्यव्यभिचारोन्नयनमपि साधु संगच्छते इत्याहुः। न व्यासक्त। संयोगवद्द्रव्यत्वेन द्रव्यत्वाभावस्यैव संयोगाभावस्या
भावेन संयोगेन द्रव्यत्वाभावस्य द्रव्यत्वस्य साधनसंभवादेकदेशस्य दुष्करत्वान्नस्यापुपाधित्वम्। लक्षणं तु साध
नवृत्तिसाध्याभावोन्नायक। व्यतिरेकप्रतियोगितावच्छेदकरूपवत्त्वम्। प्रतियोगित्वं तदभाववत्त्वेयुत्पादितं चप्रति
योगितावच्छेदकस्यान्यान्याभावाभावत्वं शेषं पूर्ववदिति। विशेषणव्यभिचारित्वेन तादृशसामान्ये तो दृष्टमेवैक वि
शेषबाधे भावयति विशेषांतरप्रकारिकामनुमितिं न चातिरिच्यते विशिष्टभावो विशेषेण विशिष्याभावान्या
मिति मते नेदं स्वमते नाह। यद्वेति। घ्राणरूपस्पर्शश्रवणत्वभिन्नादिवृत्तसंख्यापरिमाणवृत्त्यपुपाधिभिन्नाये
णायव्याप्यतमेव साधुम्यत्मेकत्वादेरविप्रत्यक्षत्वागीकारात्। उद्भूतरूपादिपरत्वेन साध्ये हेतौ च प्रसरूपदर्शपि

शिरो. ६४

रिंद्रियप्रत्यक्षपरं द्रव्यपदं च वहिर्द्रव्यपरं महत्त्वपदं च जन्यमहत्त्वपरमिति ॥ व्यापकव्यभिचारित्वं च व्यापकतावच्छेदक
रूपावच्छिन्नाभाववद्वृत्तित्वं न च द्रव्यपदवैयर्थ्यम् ॥ विशिष्टाभावस्यातिरिक्तत्वात् । द्रव्यत्वाव्यभिचारित्वे सति उद्भूतरू
पावच्छिन्नाभाववद्वृत्तित्वं न च द्रव्यपदवैयर्थ्यम् ॥ विशिष्टाभावस्यातिरिक्तत्वात् द्रव्यत्वाव्यभिचारित्वे सति उद्भू
पादिव्यभिचारस्य वहेतुव्यापकत्वोपन्यासस्तत्तर्कप्रदर्शनायेति तत्त्वम् ॥ द्रव्यत्वाव्यभिचारो द्रव्यत्वाभाववद्वृत्ति
त्वं मित्रातनयत्वमित्यनुमानमनुपाधेः प्रमाणेनैतेन साधनाव्यापकता निर्णयदशायामास्ते न तु तद्व्यभिचारित्व
तद्वत्त्वं तन्नाभाववद्वृत्तित्वम् । तथा च साधनविकल्पोयं साध्यव्याप्तत्वान्तरस्य तस्याहाऽव्यभिचारश्चेति । ननु चैवं शेष
वैयर्थ्यं भूमज्ञानाभाववद्धर्मिभेदादैवैयर्थ्यमिति चेन्न । तथापि मित्रातनयत्वव्यापकत्वविशेषितहेतुत्वमेव
गमकमिति चेन्न । यत्किंचिदधिकरणनिष्ठात्यन्ताभावाप्रतियोगित्वस्य फलतः सामानाधिकरण्यपर्यवसि
तत्त्वोक्तत्वात् । तथा चायमर्थः मित्रातनयत्वाधिकरणं पक्वाधिकनिष्ठात्यन्ताभावाप्रतियोगित्वे सति शाकजत्वाव्य राम. ६४

भिचारित्वात् मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति यावत् । तेन श्यामत्वादौ न व्यभिचारः । अव्यभिचा
रश्चेत्यादि । तथा च वह्नौ हि । यद्धर्मा व्यभिचारित्वे सति यद्धर्मावच्छिन्नयत्साध्यव्यापकव्यभिचारि तत्र तत्सा
ध्यव्यभिचारीति सामान्यव्याप्तावघटत्वं दृष्टान्तं तदस्य व्याहुः मेयत्वादावपि विशेषणवति विशिष्टसाध्यव्याप
कोपाधिव्यभिचारेणानुद्दृ साध्यव्यभिचारः साधनीयः । एवं विशिष्टसाध्यव्यापकस्यापि सामान्यतु साध्यव्य
भिचारोन्नायकतयोपाधित्वे समर्थसामान्यतरपरसाधारणतदुन्नायकतामात्रेण तथात्वमेव स्यादप्रयत्नि । प
हेत्वादि । अत्र च पर्वतवह्निरुद्भवारणाय साध्यसमानाधिकरणेति बोध्यम् । व्यभिचारोन्नायकत्वं यत्र कुत्रचिदिति ।
एवं च पृथिवीत्वादिना गुरुत्वादौ साध्ये द्रव्यत्वादौ व्यभिचारोन्नायकस्य रूपवत्त्वादेर्वारणाय साधनव्यभिचारी
ति वह्नौ हि । न चैवमपि गुरुत्वादिसाध्यकरसवत्त्वादिहेतौ द्रव्यत्वे गुरुत्वादिव्यभिचारिजलभिन्नपृथिवी
त्वादिव्यभिचारित्वादिति व्यभिचारोन्नायके पृथिवीत्वादावतिप्रसंगः ॥ साधननिष्ठयद्व्यभिचारित्वेन साध्यव्य

शिरो. भिचारोन्नायकत्वस्योक्तत्वात्तदुक्तिर्वैचित्र्यादुपसर्वस्मादेव गदेऽपि तु व्यभिचारोन्नायकत्वमिहस्वव्याप्यकोटिविशिष्टतयाप्रे
६५ राद्यस्य च जलत्वेन करकात्वे साध्ये जलत्वं करकात्वव्यभिचारित्वेऽपि व्यापकत्वान्न घटे नवायदत्वे साध्ये च द्रोघटत्वव्य
भिचारी जन्यद्रव्यत्वादिरिति व्यभिचारोन्नयनसमर्थस्य स्वेऽपि स्वद्रव्यत्वस्य वारणाय साधनव्यभिचारीति। अयं घटः सत्ता
दित्यादौ सत्वं घटत्वव्यभिचारिशब्दादिवृत्तित्वादिति व्यभिचारोन्नायकस्य शब्दादेर्वारणाय साध्यसमानाधिकरणे
त्यपि वक्तव्यम्। एवं च रूपेण गुरुत्वादौ साध्ये रूपं गुरुत्वादिव्यभिचारि जलभिन्नपृथिवीत्वाभाववद्वृत्तित्वादिति व्य
भिचारोन्नायकस्य गुरुत्वादिव्यभिचारि तेजःसरूपनिष्ठव्यभिचारप्रतियोगिनः पृथिवीत्वाभावस्य वारणाय पक्ष
विकरणे साध्यनाव्यापकत्वं तेन व्यभिचारोन्नायकत्वं वक्तव्यम्। यथा कथंचित्स्वव्यभिचारेण व्यभिचारोन्नायकमात्र
स्य लक्ष्यत्वे पक्षसाधनव्यक्तव्यापकत्वं तदंशको व्यभिचारोन्नायकत्वं वाच्यमित्याहुः। ननूक्तपारिभाषिकमुपाधित्वं त
थापि साध्यव्यभिचारानुन्नायकतया दोषत्वाभावेन तदुद्भावनेऽर्थान्तरं स्यादेवेत्यत आह। किंचेति अत्राभासान्तरस्य तदानीं ज्ञाप रा.म. ६५
मानस्य। तथा च तस्यावश्यापुपेयदोषभावते न १

तदुद्भावनेनार्थान्तरमिति भावः। अत्र वदन्ति। साध्योपन्यासानन्तरं तत्साधकस्यैव तत्साधनोपन्यासानन्तरं
तद्दोषस्य व्यभिचारादेराकांक्षितत्वात्तदनुद्भावे साकांक्षस्य साधकस्य शुद्धसाध्यव्यापकस्योपाधेरुद्भावनेऽवसरप्रा
प्राप्तकालत्वं कैवव्याप्यरे परया तत्साधकस्यावच्छिन्नसाध्यव्यापकस्य न्यायान्तस्साधकपरंपरायाऽपि
प्रथममनुपन्यासे तथात्वं न स्यात्॥ न च निग्रहस्थानत्वेन विशेषः प्रतिज्ञाहान्यादितो हेत्वाभासानां वहि
तस्य तथात्वायोगात्। न च विभाजकसूत्रस्थेन हेत्वाभासाश्चेति चकारेणानुक्तसमुच्चयपरेण साक्षात्परंप
रयावानुमितिदोषोन्नायकस्य संग्रहः। तथा सति व्यभिचारस्येवाश्रयासिद्ध्यादेरुन्नायकस्य तदुभयोन्ना
यकपरंपरायाम्पि तथात्वापाततः। न च विभाजकसूत्रस्थेन हेत्वाभासाश्चेति चकारेणाप्राप्तकालतामात्रस्या
स्यत्रापि प्रथममनुपन्यासः कथकसंप्रदायानुरोधादेव कर्तव्यः। तादृशसंप्रदायमननुरुध्यानस्य तदुद्भावे
कं पराभवतः। ज्ञापयन्ति वारणीयतापत्तेश्च तस्मान्नयमे शुद्धसाध्यव्यभिचारे बोद्धव्यं। तत्र कथं तावन्न हेतुत्वे

शिरो.
६६

नमुदृसाध्यव्यापकोपाधिव्यभिचारः विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यापकस्योपाधेर्विशिष्ट
साध्यस्य वाव्यभिचारः अत्र च विशेष्यकक्ष्यंतायां विशिष्टसाध्यव्यापकोपाधिव्यभिचार इति॥ दर्शने च व्यभि
चारादेरिव तत्तद्व्याप्यादेरपि ज्ञानं व्याप्यादिग्रहप्रतिबंधकं तथा च साध्यव्यभिचारव्याप्योपाधिव्यभिचारज्ञानय
मिति चोद्भावनीयम्। साध्यव्यापकत्वानिश्चयात्। उपाधित्वोपयिकतदनिश्चयात् अनुकूलतर्कादिना तादृश
व्यापकत्वनिश्चये तु वाधोन्नीतवद्दृत्वेपि वनिश्चयतोपाधिः न च स्वव्याघातकत्वात्रायमुपाधिः तद्भिन्नसर्वानुमा
नेपि पक्षेतरत्वात् तरस्योपाधित्वसंभवः अनुकूलतर्कादिना तस्य साध्यव्यापकत्वनिश्चये व्याप्यकव्यभिचारि
णा व्याप्यव्यभिचारावश्यंभावेन तद्योगात्। अत एव पक्षेतरस्योपाधित्वे सर्वत्रैवं तादृशोपाधिसंभवेनानुमानमा
त्रविलोपे व्यभिचारानुमापकत्वगर्भस्योपाधित्वस्य व्याघातकत्वमिति परास्तम् नाकयकसंप्रदायानुरोधाद्वाधानुन्नीतः पक्षेत
रोनोपाधित्वे न कस्यापासुद्धाव्यत इति वदन्ति। पक्षमात्रेति। यद्यपि पर्वतावयवहत्तिरूपादेरपि व्यावर्त्तकं तत्र तथा राम.
६६

पि तस्य वाहत्तिर्नोपाधितायामुपयुज्यते अपितु पक्षस्यैवेति तन्मात्रव्यावर्त्तकत्वमुक्तम्। इदं चानुपाधितायां न वी
जं परिभाषामात्रत्वात् किं त्वनुकूलतर्काभावेन तादृशसाध्यव्यापकत्वानिश्चय इति द्रष्टव्यम्। अत एव व्यापकता
ग्राहकप्रमाणसद्भावादेवा आर्द्रेंधनेति। अथ यावत्सु तेषामन्वयव्यतिरेकाभ्यामार्द्रेंधनत्वादिनैव कारणत्वं न पुनरार्द्रें
न्धनप्रभववह्नित्वेनेति चेत्तत्किं चातः। न हि कारणतावच्छेदकमेव व्यापकतावच्छेदकं तादृशाभावप्रतियोगितानवच्छे
दकस्यैव तत्त्वात् तन्नाहवच्छिन्नप्रतियोगिताकाभावस्य चातिरिक्ततया तद्धत्तित्वेन साध्यव्यभिचारसाधने दोषा
भावात्। सत्यपि चार्द्रेंधनेतरन्तं प्रत्युक्ते च वह्नौ दाहप्रतिबंधकसत्त्वे धूमानुत्पादात्। उक्तमतत्कारणाभावस्य वह्नौ विशेष
रूपेण कारणत्वकल्पनेपि चोपपत्त्या वह्न्यतत्कारणाभावानां दाहप्रतिबंधकाभावानां तत्कारणत्वकल्पनानौचि
त्यात्। एकस्यामार्द्रेंधनव्यक्तौ प्रतिरुद्धायां तेनैव व्यक्त्यंतरादुमात्रादाहादिंधनजन्यधूमप्रतितत्वदभावानां कारण
त्वस्यावाच्यत्वे प्रकृतस्य वह्नेर्दैवेनाप्रकृतस्य धूमानुत्पादादार्द्रेंधनप्रभववह्नित्वेन कारणत्वमित्यपि वदन्ति। तदुक्तं यैरो

शिरो. ६७

त्तिः आर्द्रेन्धनप्रभववह्नित्वसामान्यं विना धूमसामान्यस्य प्रकृष्टतादृशवह्निं विना प्रकृष्टतादृशधूमस्यानुत्पादनियमा
दार्द्रेन्धनप्रभवत्वहेतेरेव धूमोपधायकत्वेनार्द्रेन्धनप्रभववह्नित्वं कारणतावच्छेदकमर्थवशात्संपद्यते नान्तरीयकमेवा
स्तु फलतो न कश्चिद्विशेष इति भावः । अन्यथेतिः तादृशान्वयव्यतिरेकाभ्यामुत्कृष्टरूपस्य तद्धेतोर्द्रव्यस्यैव वा कार
णत्वमुभयथापि व्यापकत्वमुत्कृष्टरूपत्वेन तत्तदनुरूपवर्णितमेव ॥ घटोन्मज्जनेतिः ध्वंसप्रागभावानधिकरण
कालस्य प्रतियोग्यधिकरणत्वनियमादिति भावः । न च प्रागभावस्य प्रतियोगिध्वंसरूपत्वं तद्ध्वंसोऽपि प्रतियोगिनो ध्वं
स इति वाच्यम् । अप्रामाणिकध्वंसतत्कारणधाराकल्पनातो ध्वंसानन्तत्वकल्पनाया एवोचितत्वादिति भावः । का
र्यकारणयोरेव कार्यकारणभावग्राहकप्रमाणक्रोडीकृतयोरेवः पक्षेतरस्येत्यादि । न तु संदिग्धोपाध्येतरत्वस्य हेत
रोऽपि व्यभिचारशंकामादधानः केन वा निरसनीयः स्वव्याघातकत्वं च निराकृतमेव । अथ अत्र कश्चिदुपाधिमभि
ध्य । तीति शंकाशंकापिशाचीत्याशयान्न व्यभिचारशंकाधायिका तथापि हेतौ स्वोपाधित्वशंकापि तदाहितापि वा व्यभि रा.मं. ६७

शिरो. ६८

चारशंकैव न प्रतिबन्धिका अन्यथा निरुपाधिसहचारभंगप्रसंगमात्रबलप्रवृत्तानामनुमानानां विलयप्रसंगा
दिति चेत्तन । संदिग्धोपाध्येतरसाधारणव्यभिचारशंकाधानप्रयोजकरूपवत्तापक्षेतरेण न हाधाने प्रयोजन
कृतेः प्रतिबन्धकत्वासंभवात् । व्यभिचारज्ञानत्वेन प्रतिबन्धकता या कारणविशेषाजन्यत्वादिकं न निविशते गो
रवान्मानाभावाच्च । कथमन्यथाकरवह्निसंयोगः सर्वसंयोगो वा प्रत्यक्षसंयोगधर्मीति रिक्तधर्मसमवा
सामवायित्वादित्यनेनशक्यादिसिद्धिः । निरुपाधित्वस्याप्रयोजकत्वादिति चेत्तन । निरुपाधित्वस्यैव प्रयोजक
त्वात् । तथात्वे विचाप्रयोजकत्वे निरुपाधित्वाभिमतानामितरेषामपि तथात्वात् । अत्रैव च कुत्रपक्षातिरिक्तैव्य
भिचारशंका । कथमयं व्यामोहः पक्षातिग्राहकदृष्टतरप्रमाणविरहेणि निरुपाधित्वमिति विरुद्धतत्वं । ततः पक्षे
सपक्षैकदेशवृत्तिधर्मावच्छिन्नसाध्यव्यापकानां सपक्षैकदेशवृत्तिधर्माणामनुपाधित्वं संभवति इत्यस्तु तथा नो
ति प्रसंगस्तथा तत्त्वव्यासाम इति सत्यं । कथकसंप्रदायानुरोधात्कथायां संदिग्धोपाधित्वेन पक्षेतरो नोद्भाव्यः इ

शिरोम० ६८ बंधरोगंग्रंथरत्नप्रकुः सोपाधावेकत्रैति उपलक्षणमेतत्। व्यभिचारित्वमुपाधेरवश्यंभावमात्रेण तात्पर्यं उपजीव्योपजी
वकभावो हि न कार्यकारणभावो संभवात्। व्याप्यव्यापकभावस्तु किंचित्करः विशेषणतत्त्वज्ञायमानतद्रूपतयाता
एकमविज्ञायाप्यन्यतरज्ञानाद्धन ज्ञाप्यज्ञापकभावः। न चानुकूलतर्कविरहो दैवव्याप्तेरग्रहे कृतमुपाधिज्ञा
नेन। विनाप्यनुकूलतर्कं व्यभिचाराग्रहे व्याप्तिग्रहसंभवादिति भावः। नयथाद्वयमिति। अत्र पक्षेऽतिप्रसंगोऽयं। प
ति च साध्यस्याव्यापकत्वं व्यापकव्यावृत्त्यप्रतियोगित्वमर्थः सत्प्रतिपक्षे ज्ञापकत्वं वा तद्रूपकतावीजं तत्त्वात्प्रयोजक
त्वात्साधनाव्यापकत्वं नोपात्तम्। इत्थं च साधनस्य न सोपाधित्वव्युत्पादनाय केवलमस्य साधनस्येति। यद्वा साध
नस्योत्पन्नेतरमधिकरणादिति। शरणात्साधनवन्निष्ठसाध्यव्यापकत्वं व्यापकव्यावृत्तिप्रतियोगित्वमर्थः। तथा च स
प्रव्यभिचारित्वेनेत्यादेरुपवर्णितार्थनिष्कर्षः। व्यापकतया शुद्धस्य साधनावच्छिन्नस्य च साध्यस्य व्यापकानामुपाधी रा०म०
नां पक्षे कश्चित्साधनवति वा साध्याभावस्यैकमनुत्थयन प्रकारमाह। स चेत्यादि। साधनवत्वेन ज्ञायमानेपक्षे साध्य ६८

साधनसंबंधाभावः सिध्यन्नुद्धर्मतावला त्साध्याभावमादाय पर्यवस्यति। ननु शुद्धसाध्याभावो ज्ञापकस्यार्द्रे
धनवत्वादेः कथं साध्यसाधनसंबंधाभावो ज्ञापकत्वमत आह। आर्द्रेन्धनेति। अत एवेति। साध्याभावसत्वे सा
ध्यसाधनसंबंधाभावस्यावश्यकत्वात्तद्ज्ञापकत्वमनुक्तमिति भावः। द्रव्यत्व इति। द्रव्यत्वस्य हेतुत्वाभिप्रायेण
अयं च प्रायशः संभवतीत्यभिहितः वस्तुतः प्रकारभेदेऽपि न क्षतिः। तथा च शुद्धसाध्यव्यापकोपाधिस्थले शुद्ध
साध्याभावः अवच्छिन्नतद्व्यापकस्थले तदवच्छेदकावच्छिन्नसाध्याभावो वच्छेदकत्वविशेषिते ननोपाधिविरहेण
शुद्धसाध्याभावः साध्यते। अत एव गगनादौ स्पर्शवत्त्वं न हेतुमिति पक्षे उपाधेस्तद्व्यापकस्य साधनस्य संबंधित्वात्साधन
विशिष्टसाध्यं निवर्तनेत्यर्थस्तत्पत्याक्षतं यत्स्वरसासिद्धस्तद्रूपकतावीजं यदि सत्प्रतिपक्षो ज्ञापकत्वमिह तदा
साधनांनुप्रवेशो व्यर्थः। जलं द्रव्यं गंधवत्वादित्यादौ पृथिवीत्वादावंतिव्याप्तिरत्र। अयासिद्धौ ज्ञापकत्वे तदा सा
ध्यानुप्रवेशो निरर्थकः। जलं गंधवत् द्रव्यत्वादित्यादौ पृथिवीत्वादावतिप्रसंगस्य च पक्षधर्मतासंभवमसिद्धेः सत्प्रति

शिरोम. पक्षः स्ववोऽव्यापकत्वं तदा वायुः स्नेहवान् गंधवत्वादित्यादौ जलत्वघटितावद्व्याप्तिः साधनविशिष्टसाध्याप्रसिद्धेः।
६९ साध्यसाधनवत्वप्रकारकबोधविरोधिबुद्धिकाभावोऽव्यापकत्वमर्थः। विरुद्धादिवैकैकाभावबुद्धिरुभयपक्षावु-
द्धिं विरुद्धस्य हेतुधूमादिरूपतयाविधबोधप्रसिद्ध्यासमर्थनीयमित्यपि वदंति। यत्तु साध्यावृत्तित्वे सति साधनावृ-
त्तिर्यस्तद्भूत्यत्वेन साध्यसाधनेऽनुगमय्यतरभावोऽव्यापकत्वेवाच्यमिति॥ तत्रापत्रभिन्नाभिन्नसंबंधेन साध्यसाध-
नभावस्तत्र सद्धेतुनासंबंधेन संबंधेन साध्यस्य साध्यतासंपादकेन च हेतोरन्यत्रापि यथाकथंचित्संबंधेनोभयस्याभावो
ऽव्यापकेति व्याप्तेः। किंच तादृशधर्मसमूह्यत्वेन रूपात्रेण वा साध्याभावस्योऽव्यापकत्वमभिमतं। नाद्यः साध्यसाधनास्यतर
वत्तितदसंभवात्। नांत्यः धूमेन पर्वतेवह्नौ साध्ये महानसीयवह्नित्वावच्छिन्नाभावोऽव्यापके महानसत्वादावतिव्याप्तेः। पक्ष
पक्षावृत्तित्वे सति ये साधनवद्वृत्तयस्तद्भूत्यत्वेन पक्षसाधनवृत्ताविति प्रमाविशेष्यत्वेन वा द्वावनुगतीकृत्य तत्र साध्या-
वर्त्तकत्वमित्याहुः। तत्र यदि सत्वाति पक्षव्यभिचारयोरन्यतरमात्रेऽव्यापकत्वं हृपकता वीर्ज तादात्म्यायोरनुगमनमफलं अथय राम.
६९

यासंभवमनुभयोऽव्यापकत्वं तदावृत्तिहेतुके सत्यतिपक्षोऽव्यापकेऽव्याप्तिरिति॥ पक्षेपि च पक्षतावच्छेदके साधने च व-
र्त्तते यत्र छेत्स्य पक्षतावच्छेदकसाधनेदतिप्रतीतिविशेष्यस्य वाश्रये साध्यव्यावर्त्तकत्वमर्थमाहुः। तन्वापि कि-
येन संबंधेन हेतुतानेन। अथ येन पक्षतावच्छेदकं पक्षे वर्त्तते तेन उतयेन केनापि तादृशधर्माश्रये साध्यव्यावर्त्तक-
त्वमभिमतं तत्र नाद्यः जलपक्षकवह्निसाध्यके संयोगसंबंधेन साधने धूमादौ वह्निसामग्र्यादावव्याप्तेः पक्षतावच्छे-
दकस्य संयोगेनावृत्तेः। संयोगेन धूमवत्त्वस्य वह्निमत्वनियमात्। न द्वितीयः। घटो जातिमान्मेयत्वादित्यादौ समवा-
यित्वादावव्याप्तेः। वह्निमत्पर्वतपक्षके पर्वतो वह्निमान्धूमादित्यत्र धूमाद्यव्यवेव वह्निव्यावर्त्तके वह्निसामग्र्यादाव-
तिव्याप्तिः। अत एव नेतरोपीत्यादिस्थले पक्षतानीयामिति कृतं पल्लवितेन। व्यापाद्याप्रसिद्धा। व्यापाद्यस्य वह्निव्या-
पकत्वे सति धूमाव्यापकत्वस्याप्रसिद्धेः। अनुमितीति। असत्कृतं व्यभिचारोऽव्यापकत्वं तदुन्नेयनसत्पक्षवपोऽन्यत्वं
न व्याप्तिपक्षधर्मतारूपं पर्यवसितं साध्यव्यापकत्वादिकं चानुमितिप्रतिबंधकज्ञानविषयतावच्छेदकमेवेति भावः।

शि·म· सामान्यलक्षणमितरथ्याहृत्यौपाधिकं विशेषलक्षणं गुरुदूषकताया मुपयुज्यत इत्यत आह। विशेषेति· यथा आर्द्रेतः
७० वच्छिन्नसाध्यव्यापकोपाध्यव्याप्यत्वं किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव वक्तव्यम्। तथा च वह्निना धूमेन वा
धूमस्य वह्नेर्वा साधने पक्षेतरस्य तद्रूपज्ञानादनुमितिप्रतिबंधापत्तिरित्यर्थः। व्यवहारोपयिकत्वे चेत्तत्रोपाधिव्य
वहारापत्तिः पर्य। वसिते साध्याभिधाने चास्मत्त्रय एव प्रवेश इति भावः। व्यवहारोपयिकत्व व्यभिचारेण साध्यव्यभिचा
रोन्नायकत्वं लक्षणे तु तत्र साध्यसमानाधिकरणत्वे सति तत्र साधनाव्यापकत्वं साध्यसाधनमभेदाद्भिन्नमेव तत्त्वस्य
तो व्यभिचारिणः साधनस्यैवानुप्रवेशाच्च नातिप्रसंगः। तद्रूपेण गुरुत्वे साध्ये पृथिवीत्वाभावादुपाधिता
पत्तिः। गुरुत्वव्यभिचारिरूपवत्त्वे तद्व्याप्यत्वात्। तद्व्याप्यरूपवत्त्वे च गुरुत्वाव्यभिचारादिति। हेत्ववरोपायिकं
तुमपासंभवमननुगतमेवेति मतमिदं परे परिकुर्वन्ति तत्र साधीयः। तथाहि॥ साध्यसाधनव्यक्तित्वरूपागर्भेतो रा·म·
पाधित्वेऽपि तु साध्यतावच्छेदकसाधनतावच्छेदकधर्मगर्भेण तल्लक्षणत्वेन सकलगुणव्यक्तिषु सोपाधेरपि द्रव्यत्व ७०

स्य गुणत्वेन सकलगुणेष्वेव निरुपाधित्वात् गुणत्वेन गुणे साध्ये सत्तात्वेन रूपेण सोपाधेरपि सत्तायां गुणकर्मा
न्यत्वविशिष्टसत्तात्वेन निरुपाधित्वात्। तथा च तद्रूपावच्छिन्ने साध्ये तद्रूपावच्छिन्ने साधने च क उपाधिरित्यत्र तद्रूपा
वच्छिन्नसाध्यसमानाधिकरणत्वे सति तद्रूपावच्छिन्नसाधनाव्यापकत्वमनुगतं लक्षणं वाच्यम्। न तु तद्रूपावच्छि
न्नतत्तत्साधनव्याप्यव्यापकत्वमननुगमात्। तथा च गुरुत्वत्वावच्छिन्नसमानाधिकरणस्य रूपत्वावच्छिन्नाव्या
पकस्य पृथिवीत्वाभावादेरुपाधित्वं दुर्वारम्। व्यभिचारित्वेन साधनविशेषणं तत्प्रदर्शनमेवेति संक्षेपः। उपाधि
लक्षणे साधनाव्यापकत्वविशेषणं दूषकतायामनुपयोगात्। अव्याप्तिकरत्वाद्वेति सत्प्रतिपक्षोत्थापकत्वेनो
पाधेर्दूषकतावादिनामभिप्रायं प्रकाशयति। केचित्त्विति। साध्यतावच्छेदकावच्छिन्नं साध्यं चेन्नोपाधिः। परमनु
द्भाव्यः। साध्याविशिष्टत्वात्। पक्षे साध्यनिश्चयेऽनुमानस्य वैयर्थ्यादनिश्चये च तस्यायोगात्। संदिग्धोपाधि
त्वेनापि न तदुद्भावनमित्याह। अनुमितीति· हेतोः साध्यव्यभिचारसंदिग्धत्वे तत्संदिग्धोपाधिना असंदिग्ध

शिरोम॰ ग्रेणोक्तं यत्तस्य संदिग्धोपाधित्वमिति तत्त्वमाह तु व्यभिचारीति· व्याप्यसंशयस्य व्यापकसंशयहेतुत्वादिति भावः अन
७१ यतत्र मानाभावः कोटिस्मरणादिसंपत्तौ तदुपपत्तेः क्वचित्तद्विधानस्यापि व्याप्यतत्त्वादयोर्व्यापकतदभावसाह
चर्यस्याग्रहीतत्वेन तत्स्मरणसंभवोपक्षीणत्वात् । नन्वेवं हेतुतत्संशयाद्व्यापकसंशयस्याप्यभावादिति वाच्यम् । महा
नसे धूमालोकेन जलह्रदे इति स्मरतो पर्वतादिकमपि पश्यतो वह्न्यादिसंशयभावाभावाभ्यां धूमालोकेन संशयभावा
भावदर्शनात्तस्यापि तद्धेतुत्वात् अतएवोत्कटकोटिकाद्व्याप्यस्य संशयाद्व्यापकस्याप्युत्कटकोटिकः संशयः । का
रणोत्कर्षेण कार्योत्कर्षात् । समानेत्यादिस्तत्रैव तूपलक्षणपरम् । तत्रस्थस्वकारी वा तुल्यसमुच्चयार्थ इति वदन्ति । को
टिद्वयसहचरितधर्मवत्त्वपाधर्मिज्ञानं हेतुः धर्मस्यैकत्वं ज्ञानस्य च विशिष्यत्वेनोपयुज्यते गौरवात् अवगाहते च लिंग
संदेहोत्पत्तौ तिकतदभावसहचरितो लिंगतदभावोभयधर्मिणाम् । तथा च साधारणधर्मवत्त्वात्साधारणत्वम् इति न व्याप्ताः । लिंग
तदभावयोः प्रत्येकमेकैककोटिसाधारणयोर्मिलितयोरसाधारण्यं सत्प्रतिपक्षस्थले विरुद्धयोरिव हेत्वोरिति तु दी राम
७१

काकारानुयायिनः । इत्थं च साधनाव्यापकत्वसंदेहे साध्यव्यापकव्यभिचारसंदेहात्साध्यव्यभिचारसंदेहो हेतोः स्फुट ए
व । साध्यव्यापकत्वसंदेहे तु साधनाव्यापकव्याप्यत्वसंदेहात्साध्ये साधनाव्यापकत्वसंदेहो बोध्यः । उपाधेः साध्यव्या
पकत्वसंदेहेनाहितात्साधने साध्यव्यापकव्यभिचारसंदेहात्साध्यव्यभिचारसंदेहः इत्थमेव च स्थलद्वये संशयस्य व्य
भिचारसंशये स्पाक्षि सेमवइत्यपि वदन्ति उभये ति · एकांशेऽपरस्य एकविशिष्टापरसाध्यतापत्त्वे केकस्योपाधित्व
मिति तु तत्त्वम् । ईश्वरेति · वस्तुतः सद्धेतावपि तत्पक्षग्रहदशायामनुपाधिसंशयेन व्यभिचारसंदेहदर्शनाभावः । संदिग्धेति ·
न चानैकांतिकत्वसंदेहप्रतिबंधको ननु तद्धानमिति तद्दर्पनदुद्भावनमफलमिति वाच्यम् । अनैकांतिकत्वसंशया
न्ममव्याप्तिग्रहो मा भूदित्यभिप्रायेण । प्राचां हेतुदोषत्वेनासाधकतासाधकतया । जिज्ञासादिद्वारा परंपरया संदेहो
प योगित्वेन च तदुद्भावनस्य सांप्रदायिकत्वात् । उपाधित्वस्य संशयो निश्चये च ज्ञापमानेन ज्ञानमनुमितिविरुद्धादि
तदेवास्य दूषकताबीजमित्यभिप्रायेणाह । संदिग्धेति · तद्व्यतिरेकस्य कस्यचिद्व्याप्यत्वेन क्वचिद्धेतुत्वे दूषकत्वेन संदिग्ध

शिरोम. ७२ त्वात्. वाधोन्नीतेति. मत्तुवाधे उन्नवतीरो तत्रएव हेतौ साधकत्वात् कृतमुपाधिना न वा साधारण्यं प्रकृतस्यैव सपक्षत्वा
त्. अननीतो तु नोपाधित्वं पक्षेतरान्तरवृत्तसाध्यव्यापकतायाः एवाग्रहाद्‌त्तु कॢप्तत्वकौद्दिनाकर्षविन्न द्वहे चनासा
धारण्यं। व्यतिरेकितयान्वयव्याप्त्यग्रहस्य सत्वातिपक्षतया च सत्वातिपक्षांतरस्याकिंचित्करत्वादित्यरुचेराहापक्ष
वृत्तित्वेति. पक्षेतद्वद्धेत्दशायां तद्भावग्रहासंभवादिति भावः। व्याप्तिविरहरूपतां निरस्य व्याप्तिज्ञानाभावद्वारकतां नि
रस्यति। नापीति. अनौपाधिकत्वज्ञानस्य उपाधिकत्वज्ञानाभावस्य कारणविघटकतया कारणाभावरूपताद
शज्ञानविषयतया अनौपाधिकत्वज्ञानस्य कारणत्वे नान्वयव्यतिरेकसिद्धं परं तु सोपाधित्वज्ञानस्य प्रतिबंधकता
याविनाकारणीभूतज्ञानविघटनसंभवित्वेन कल्पनीयं सेवत्वासिद्धं निदूषणतात्पर्यातत्पयाकृतमेव साधी
मर्दृत्यधिवदंतिव्याप्यत्वासिद्धेव्याप्यत्वाशांनेतमीं वस्तद्वारादूषकत्वम्. भिन्नधर्मिकत्वं परिहरन्नाह। नचेति। नहीति.
विरोधिविषयकत्वाभावेन साक्षात्प्रतिबंधकत्वासंभवादिति भावः. साध्यव्याप्यव्यभिचारित्वेन साध्यव्यभिचारित्वमि रा.म. ७२

त्युभयत्रैव कुव्रीहिः। तस्मादित्यादेर्दूषणोचेति शेषः। दूषकताबीजं किं तन्नमित्तोनिश्चयदशामधिकृत्याह। पक्षनिश्चयद्वारे
पाधित्वनिश्चयस्य दूषकत्वं तत्संशयद्वारा तत्संशयस्यापि तथात्वमिति भावः। व्यभिचारज्ञानद्वारेति। मानसे व्यभिचा
रनिश्चये उपाधिज्ञानं विशेषदर्शनरूपत्वेनोपयुज्यते। व्यभिचारानुमाने तु नरत्रैव हृस्ते। व्याप्तीति। साध्यसंबंधिता
वच्छेदकरूपविरहः। साधनतावच्छेदके साध्यसंबंधितानवच्छेदकत्वपर्यवसन्नः साध्यवदन्यावृत्तित्वविशिष्टसाध्यव
दवृत्तित्वविरहो वोत्रेयः। ननु स्वसमानाधिकरणात्यंताभावप्रतियोगिसाध्यकत्वस्य त्वस्यानुगतस्याभावेन तत्र साध्य
मपर्यवसानेन साध्यप्रसिद्धिमात्रे रोवकृतात्पर्यत्वात्। साध्यव्यापकोपाधिव्यभिचारित्वेन हेतौ साध्यव्यभिचारित्वं सा
ध्यव्यभिचारित्वं साधनाव्यापकोपाधिव्याप्यत्वेन साध्ये साधनाव्यापकत्वमनुमेयमिति तु नव्याः। व्यतिरेकिणि साध
नेव्याप्तिविरहस्य व्यभिचारस्याप्रोत्रयने उपाधिः साधनाभाववद्वृत्तित्वं. व्यभिचारास्फुटताद्दशायामुपाध्यनुसरणाय
त्राधिकरणे हेतोः साध्यव्यभिचारित्वं तद्वृत्तिधर्मीदौतास्य साध्यव्यापकत्वग्रह इति भावः। उपाधिमात्रेति। तेनापिव्या

शिरोम· भिचारानुमाने तत्रापि तथाविधोपाधिसंभवादिति भावः। वस्तुतस्तु व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वेन व्याप्यव्या-
७३ पकभावव्याघातापत्त्या हेतोः साध्यव्याप्यत्वेन साधनाभाववद्वृत्तित्वस्य साध्याव्यापकत्वान्नोपाधित्वमिति। अत्र हेतौ ति·
व्याप्यत्वाभावसाधनाभिप्रायेण॥ साधनव्याप्यस्योपाधित्वे च नैव दोषः। साधनेति· यथाश्रुताभिप्रायेण·प्रति-
योगिव्यधिकरणसाधनाभाववद्वृत्तित्वस्य साधनवदन्यवृत्तित्वस्य वोक्तौ तथात्वासंभवात्। एवं च सत्प्रतिपक्षेति
स्थितोपाधिर्वक्ष्यमाणदिग्घोपाधिरुद्भाव्यः। न च तत्र व्यभिचारसंदेहस्य शक्तिर्हेतुसमाजाद्व्यसिद्धेः। किं त्वनेनिवा-
व्यम्। परस्परप्रतिबन्धे नैवानुमित्यनुत्पादे तत्र व्यभिचारसंदेहस्यावश्यमनुसृततो मानाभावात्। उपाधिसंदेहादि-
शिष्येत्वत्र व्यभिचारसंदेहे न तुल्यबलत्वाभावात्। न वा तुल्यबलेन सत्प्रतिपक्षो व्यभिचारादिशंकाधानं वा स्वरस-
तः संदिग्धव्यभिचारज्ञानादिनापि तथात्वप्रसंगादिति। अत्र केचित् उपाधौ तुल्यबलत्वे सत्प्रतिपक्षोत्थापकतया त-
र्कादिसाचिव्यादधिकबलवत्त्वे च बाधोन्नायकतयापि दूषकत्वं। व्याप्त्यादिप्रतिसंधाने तदुन्नयनस्य तत्रानुमितिप्रतिरोध राम· ७३

स्य चटुर्वारत्वात्· परे तु सार्वत्रिकत्वं लक्षणस्येति धीपदात्र साधारणविपर्ययइति· इदं सत्प्रतिपक्षोन्नायकत्वमभि-
प्रेत्य· पर्यवस्यति रेकिणः सत्प्रतिपक्षत्वात्सत्प्रतिपक्षे सत्प्रतिपक्षान्तरस्य दोषत्वान्नेहासाधारणं दोषः। तथा-
पि सत्प्रतिपक्षोन्नयनोपयिकसाध्यव्यापकत्वग्राहकप्रमाणाभावेनास्यार्थम्। तदयं निष्कर्षः। यत्र यद्धेतौ यत्राप-
तयाहत्यकत्वमुपाधेस्तत्र तदुन्नयनोपयिकरूपवैकल्यमेवाभासत्वप्रयोजकम्। एवं च यत्र स्थापनायां पक्षता-
वच्छेदकसामानाधिकरण्येन साध्यसिद्धिरुद्देश्या तत्र पक्षव्यावर्त्तकविपर्ययस्याभासत्वेन द्विरेहेणापक्षैकदेशे सा-
तिपक्षेपि एकदेशसाध्यसिद्धेरुद्देश्यत्वात्· यत्र तु पक्षतावच्छेदकावच्छेदेन तत्र तादृशस्योपाधित्वमेव पक्षैकदेशेऽप-
ति पक्षस्यापि तादृश्यसिद्धिविरोधित्वात्। साध्यविपर्ययाभासस्यासत्त्वमनुपाधित्वेन तत्राप्यनुपाधित्वे नानियतत्वा-
प्रयोजकनत्वन ताननाप्य ज्ञाते स्यापि तस्य व्यापकव्यतिरेकेण सिद्धिसंभावनात्। पूर्वं साधनव्यतिरेकित्वं तु नो-
पाधित्वेन नाप्यनुपाधित्वेन नियतत्वं वह्निना धूमस्य स्थापनायां प्रतिहेतोर्वह्नावार्द्रेन्धनस्यानुपाधितायास्सप्र-

शिरो. १४ गात्. परं तु पूर्वं साधनव्यतिरेकस्य प्रतिहेतावुपाधित्वे तोद्भावने सत्प्रतिपक्षमात्रमुद्भिद्येत सर्वत्रैव तत्त्वे भवात् । अत्राभो
सत्वे पि स्थापनाया विशेषाग्रहदशायामेव सत्प्रतिपक्षत्वोपन्यासात्. वस्तुतः साध्याव्यापकस्यापि पूर्वं साधनव्यति
रेकस्य तत्तदनौचित्येनाग्रहादुपन्यासासंभवात् तो बलवत्तरानुकूलतर्कं विना पूर्वं साधनव्यतिरेको नोपाधित्वेनोद्भा
व्यत इति कपक समयाद्वा साध्योपाधित्वेनोपन्यास्यात इति. यथा सकर्तृकत्वेति कादाचित्केन सकर्तृकत्वस्था
पनाया मजन्यत्वे प्रतिहेताविव यः । अनुमितिलक्षणे कार्यानुकूलत्वसंगत्याप्य पक्षधर्मतां निरूपयितुमाह
व्याप्तीति. संदिग्धेति. पक्षसाध्यस्य यादृशसंबंधावगाहिनिर्णयनिवर्त्यो यः संशयस्तत्त्वसत्ता दृशसंबंधेन साध्या
नुमितौ पक्षतेत्यर्थः । तेन न पक्षविशेष्यकसाध्यविशेष्यकसंशयानतुगमः । ता वा संबंधान्तरेण संदेहे पि निर्णीतसं
बंधेन पक्षत्वम् । न वा तमः प्रभृतिषु समवायेनाकाशसाधनेन हेतुकत्वम् । संशययोग्यतां निरस्यति । नोपीति. साध
कबाधकमाने सिद्धिबाधौ । केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव तुल्य भो वा धः । ननु तस्मापि तु न तु रामः १४

मित्यानन्तरः परामर्शानन्तरं तत्काहापरामर्शादनुमितेरसाधनताविषयकादनुमित्यात्मनोऽनुमितिरिति फलत्वला
त्कस्यनीयमित्यत आह । सिसाधयिषेति. नत्वानुमितिजनके छेवपक्षतासाच विरहविशिष्टैव सर्वत्रेश्वरनिष्ठैव स
त्वमेति वाच्यम् । तस्या नित्यत्वेन सिद्धे सत्यामपि पक्षताप्रसंगात् । न च तस्यास्तदानीं नतत्जनकत्वं तदि नयोग्य
ता न पायाज्ज । न तदुपधाने च न अनुमितेः पूर्वं तदभावात् न तत्सामग्री समवधानं कारणमात्रस्य पक्षताकुक्षि निवेश
प्रसंगात् शेषं दैवं पर्यन्तम् । तदानीं सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यतापत्ते
श्च । सिसाधयिषेति । यत्रानुमित्यानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणं अनुमितीष्टसाधनताविषयक
ता दृशस्मरणाद्वानुमित्सा अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वानुमित्साकालोत्पन्नं द्विपसन्नि
कर्षसहिता साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं चानुमितिस्तत्र पक्षतासंपत्तये सह तं तेन साधकमानवि
शेषणं । सिसाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयत्वप्रकारिका अनुमितिविषयणी [illegible] पत्तिको च रं तानेना

शि॰रोम॰ पतामितीच्छायामपि सिद्धिसत्त्वेऽनुमित्यनुत्पादात्। अनुमितित्वप्रकारिकायामपि प्रत्यक्षातिरिक्तं पर्वते वह्निज्ञा
७५ नं जायतामितीच्छायां प्रत्यक्षानन्तरमनुमितेरुत्पादात्। यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदिच्छा
भावसमुदायस्य विशेषणत्वादिच्छायाश्चाननुगमेऽपि न क्षतिः॥ धूमेनानुमिनुयामितीच्छाया आलोकपराम
र्शादसत्यामपि सिद्धौ पक्षितानुमितिस्तदा तदन्यमात्रलिंगकसिद्धौ धूमकानुमितीजिज्ञासादिवत्तस्य प्रतिबंधि
का। यदि च तत्रानुमितिस्तदा सिद्धिसत्त्वे तत्रानुमितेर्वारणाय तल्लिंगकानुमितीच्छा तदन्यमात्रलिंगकानु
मितीच्छातिरिक्तानुमितीच्छावा वाच्या। लिंगविशेषेणापि प्रतिबध्यप्रतिबंधकत्वम्। तल्लिंगकानुमितौ सिद्धिकाली
नतल्लिंगकानुमितीच्छाविरहविशिष्टान्यलिंगकानुमितीच्छैव वा प्रतिबंधिका। साध्यकमानं साध्यवत्त्वेन स्वयः
पुष्पागारस्य दिना पर्वते तेजस्त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन वह्नित्वेन तस्यानुमितेर्धर्मित्वसाध्यत्वयोर
वच्छेदकावनुप्रवेशनीयौ। यदि च पर्वतत्वसामानाधिकरण्येनैकत्र साध्यसिद्धावपि विनानुमित्सामन्यत्रानादरा राम॰ ७५

नुमितिरानुभविकी तदा धर्मिविशेषोऽपि विवेश्यो नान्यथा॥ पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धाव
पि तदवच्छेदेनानुमितिर्दर्शनात्। पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति तदवच्छेदेन सिद्धेस्तत्सामानाधिकर
ण्यमात्रेणानुमितिं प्रति तु सिद्धिमात्रस्य विरोधित्वम्। इत्थं च लिंगभेदन्याय्योऽनुसरणीयः। साध्यविशेष्यकसि
द्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वेनाप्रसिद्धपक्षविशेष्यकैव सिद्धिर्विरोधिनी। एवं च पक्षविशेष्यकसि
द्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते। तुल्यन्यायत्वात्। समानाकारसिद्धेः प्रतिबंधकत्वपर्यवसानात्।
तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा। अत एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यकैवानुमि
तिरनुभवतु इति। अत्र च व्याप्तिस्मरणादिनाश्यानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्सानन्तरोत्पन्नैवा
नुमितिः तथैव कारणीभूतस्य विशिष्टाभावस्य पर्यन्ते रितु याध्यायाः। अन्ये तु द्विविरुद्धानन्तरितायामप्यनुमित्सायाम
मनुमितिदर्शनात्। अनुमित्सायोग्यतावाच्यासाचनस्योत्पन्नेऽनन्तरं स्वविषयप्रसिद्ध्यनुत्पादः। अनुमित्सोत्तरमंतरा तु

शिरोम. मित्यनुमानादेरिव साध्यादिविलम्बेनेन्द्रियार्थ[illegible]र्शीनेऽपि साध्ये लिङ्गपरामर्शादनुमितिप्रसङ्गात्। किन्त्वनुमित्सानन्तरं लिङ्ग
१६ दर्शनादिक्रमेण यावता कालेन [illegible]नः परामर्शो जायते तावानेव कालः फलबलेन तथा कल्प्यते। अथ वा तत्रापि
न्नोपनयानन्तरमनुमित्सानाशे विसिद्धौ सत्यां यावत्कालमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्स्योपलक्षि
त[illegible]सिद्ध्यनन्तरं तत्रारोपि द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्यनुत्पादोऽनुभवसिद्ध इत्त तत्रासिद्ध्यापि तावन्ने
[illegible]लक्षणेऽयथा विशिष्य लक्षणानि यमस्त्ववह्निनैः करणीय इति वदन्ति। अत्र च यत्र साध्यनिर्णये द्यानन्तरं
[illegible]नसाध्यतद्व्याप्यविशिष्टपक्षस्य प्रत्यक्षं स्मरणं वा यत्र वा साध्यतद्व्याप्यधर्मता दृश्यव्याप्यधर्मान्तरवि
शिष्टप[illegible]लक्षसाध्यतद्व्याप्यवत्तानुमितौ विशिष्टसाधनता प्रयोजकं स्मरणं न तत्स्योरनुमित्सा न तत्साध्य
तद्व्याप्यवत्तानुमितिश्च तदनन्तरमनुमितिप्रसङ्गः योग्यताविवक्षणे वस्तुतत्रामेवेति तदिच्छाविषयसिद्ध्युपरि
तत्वेन हि शेषत्वात् पक्षसाध्यभेदेन च पक्षतापामेत्रस्यैव कार्यकारणभावः तथा च यत्र सिद्ध्यनन्तरं कदानुमिति [illegible]

[illegible]दृष्टान्ते कारणं [illegible]च्छानिवेशोऽपि गौरवात् प्रयोजनाभावाच्च। तेन पक्षकृपतत्साध्यकानुमितौ क
[illegible]तस्यानुगतत्वे ऽसाधारणप्रसङ्गः संशयेनापि स्मरेच्छानिवेशनाय प्रासोनोपादेयः। यत्तु सिसाधयिषाविरहविशिष्ट
स्य [illegible] व्यवहितोत्तरक्षणे स्विकानुमितिकमित्रापासिद्धिः सिषाधयिषाविरहविशिष्टापास्तस्याभावः पक्षताऽप्र
यत्तीय[illegible]लक्षणाऽव्याप्यकहितीयक्षणवृत्त्यव्यवहितत्वपर्यवसानात्। यत्रादिरलक्रमेण सिद्धिसिसाधयिषानुमितयस्तत्र
द्वितीयक्षणोत्पन्नतासंपन्नये द्वितीय[illegible]सिसाधयिषाविरहो विशेषणमन्त्यसिद्धेः प्राप्यमिकलक्षस्वरूपस्याकिमर्थमि
ति चेत्। यत्र च क्रमेण सिसाधयिषा[illegible]क सिद्धिपरामर्शानुमितयस्तत्र पक्षतासंपत्त्यर्थमिति॥ तत्र यत्रानुमित्सा
नाशकाले प्रात्यक्षिकी सिद्धिरथ परामर्शानुमितीन तत्र पक्षताविरहप्रसङ्गात्। अथ प्रथमक्षणमपेक्ष्य द्वितीयस्य वह्नि
तीयमपेक्ष्य तृतीयस्यापि अव्यवहितोत्तरत्वम्। स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वस्य सिसाधिकरणत्वं वा तादृ
शाव्यवहितोत्तरत्वं वाच्यम्। तथा च यत्र क्रमेण सिद्धिसिसाधयिषानुमितयस्तत्र प्रथमक्षणोपक्षणावारणायोत्तरक्षण[illegible]

विशेषणांशप्रवेशे विशिष्टांशः। द्वितीयं तु सिद्धेः तत्रैव द्वितीयक्षणोत्पन्नतासंपन्नत्वे यदि तु नारिक्षाजनिकासाँ यथा प्रति
ष्ठान्तु मितिं तदानुमितित्वव्यवहितत्वं च द्वित्रिसिद्धिभिन्नसिद्ध्यभावमात्रं परन्तेति चेन्न। तादृशसिद्धौ नाँ तत्र द्यक्षित्वेन
त्वात् कारणमूत्। निरुक्तरूपविशिष्टत्वेन वा। न्यायः। अनेन कार्यकारणभावत्रसंगात्। तादृशसकलसिद्धावनुमि
त्या विरहविशेषणतानस्यैव त्वावर्हिं। तत्रत्वमपसंबंधव्यक्तीनां तत्रत्वमथावच्छिन्नतत्रत्वेनो योगादीनां वा
संगात्। नोन्नः सत्यपि परामर्शादिकस्याश्रितिहेरनेनरमनुमितिः कस्याश्रितत्वत्व नियामकाभावात् तत्र वा का
रणतावच्छेदकावच्छिन्नसमानाधीनसमानाधीनकार्यतावाद् किं कारणतावच्छेदककोटौ निविशते। तत्पासत्त्व
त्वविशिष्टतावच्छिन्नत्वविशेषितेन स्वरूपेण व्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकस्वविषयत्वे
न। स्वसमानाधिकरणानुमितित्वव्यवहितत्वं च क्षणोत्पन्नत्वसविषयत्वेन। स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकसमा
धिकरणानुमितिकभिन्नसविषयत्वेन वा। किं वा स्वसमानाधिकरणानुमितित्वव्यवहितसर्वक्षणावच्छिन्नविशिष्टज्ञानत्वा। राम·